This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलबुरू कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क M-3073 विषय .....

नाव आश्वलायन श्रौत सुत्र (पुर्वार्ध)

लेखक/लिपीकार .....

पृठ 41 काळ ..... पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-3073

अथाश्वलायनश्रौतसूत्रप्रारंभः ॥

॥ पूर्वषट्कः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः ॥ श्रीवेदपुरुषायनमः ॥ हरिः ॐ ॥ ॥ अथैतस्यसमाम्नायस्यवितानेयोगापत्तिंवक्ष्यामोदृग्याधे
यप्रभृतीन्याहवैतानिकानिंदर्शपूर्णमासौतुपूर्वंव्याख्यास्यामस्तंत्रस्यतत्रान्नातत्वाद्दर्शपूर्णमासयोर्हविःष्वासन्नेषुहोता
मंत्रितंःप्रागुदगाहवनीयादवस्थायंप्राङ्मुखोयज्ञोपवीत्याचम्यदक्षिणावृद्धिहारंप्रपद्यतेपूर्वेणोत्करमपरेणप्रणीताइध्मम
परेणाप्रणीतेचात्वालंचात्वालवत्स्वेतत्तीर्थमित्याचक्षतेतस्यनित्याःप्रांचश्चेष्टांअंकधारणाचयज्ञोपवीतशौचेचविहाराद
व्यावृत्तिश्चतत्रचेत्कर्मैकांगवचनेदक्षिणंप्रतीयादनादेशेकर्मचोदनायांहोतारंददातीतियजमानंजुहोतिजपतीतिप्राय
श्चित्तेब्रह्माणंमृचंपादग्रहणेसूक्तंसूक्तादौहीनेपादेऽधिकेतृचंसर्वत्रजपानुमंत्रणाप्यायनोपस्थानान्युपांशुमंत्राश्चकर्मकर
णाःप्रसंगादपवादोबलीयान्प्रपद्याभिहततरेणपादेनवेदिःश्रोण्योत्तरयापार्ष्णीसमांनिधायप्रपदेनबर्हिराक्रम्यसंहितौ
पाणीधारयन्नाकाशवत्यंगुलीहृदयसंमितावंकसंमितौवाद्यावापृथिव्योःसंधिमीक्षमाणएतद्धोतुःस्थानमासनंवासर्वत्रैवं
भूतोवचनादन्यत्प्रेषितोजपति ॥१॥ नमःप्रवक्रेनमउपद्रष्ट्रेनमोनुख्यात्रैकइदमनुवक्ष्यतिंसइदमनुवक्ष्यतिंषण्मोर्वीरंह
सस्पांतुद्यौश्चपृथिवीचाहश्चरात्रिश्चापश्चौषधयश्चवाक्सममस्थितयज्ञःसाधुच्छंदांसिप्रपद्येहमेवमाममुमितिस्वंनामादिशे
तंभूतेभविष्यतिजातेजनिष्यमाणआभजाम्यपाव्यैवाचोअशांतिंवहेत्यंगुल्यग्राण्यवकृष्यजातवेदोरमयापशून्मयीतिप्र
तिसंदध्याद्धर्ममेद्यावापृथिवीवर्माग्निर्वर्मसूर्योवर्ममेसंतुतिरश्विकाः ॥ तदद्यवाचःप्रथमंमसीयेतिसमाप्यसामिधेनीरन्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हांहँ३इतिहिंकृत्यभूर्भुवःस्वरो३मितिजपत्येषोभिहिंकारोंभूर्भुवःस्वरित्येवजपित्वाकौत्सोहिंकरोतिंनचपूर्वजपंजपत्यथ सामिधेन्यःप्रवोवाजाअभिद्यवोंऽग्नआयाहिवीतयेगृणानईळेन्योनमस्यस्तिरोंऽग्निंदूतंवृणीमहेंसमिध्यमानोअध्वरेंसमिद्धोअग्नआहुतेतिद्वेंताएकश्रुतिसंततमनुब्रूयांदुदात्तानुदात्तस्वरितानांपरःसन्निकर्षऐकश्रुत्यंस्वरादिमृगंतमोंकारैंत्रिमात्रंमकारांतंकृत्वोंत्तरस्याअर्धचेंवस्यैंत्तत्संततमेतदवसानंमुत्तरादानमविप्रमोहेंसमाप्तौप्रणवेनावसानेंचतुर्मात्रोवसानेतस्यांतापत्तिस्पर्शेषुस्ववर्ग्यमुत्तमंमंतस्थासुतांतामनुनासिकौंरेफोष्मस्वनुस्वारैंत्रिःप्रथमोत्तमेअन्वाहांध्यर्धकारमध्यर्धामुक्त्वावस्यैंदथद्वेद्वेप्रथममुत्तमस्यामथाध्यर्धांताःपंचदशाभ्यस्ताभिरेतेनशस्त्रयाज्यानिगदानुवचनांभिष्टवनसंस्तवनानिंनत्वन्यत्राध्यर्धकारैंनजपःप्रागभिहिंकारांन्नाभिहिंकाराभ्यासावबहुर्षुप्रकृत्यानावच्छेदादौशस्त्रैंष्वेवहोत्रकाणामभिहिंकारंःसामिधेनीनामुत्तमेनप्रणवेनांग्नेमहाँऽअसिब्राह्मणभारतेतिंनिगदेवसाय ॥ २ ॥ यजमानस्यार्षेयान्प्रवृणीतैयावंतःस्युःपरंपरंप्रथमंपौरोहित्यान्राजविशांराजर्षीन्वाराज्ञांसर्वेषांमानवेतिसंशयेंदेवेद्धोमन्विर्द्धक्रषिष्टुतोविप्रानुमदितंःकविशस्तोब्रह्मसंशितोंघृताहवनःप्रणीर्यज्ञानांरथीरध्वराणामतूर्तोहोतांतूर्णिर्हव्यवाळित्यवसायास्पात्रैंजुहूर्देवानांचमसोदेवपानोंराँइवाग्नेनेमिंर्देवांस्त्वंपरिभूरस्यांवहदेवान्यजमानायेतिंप्रतिपद्यदेवताद्वितीययाविभक्त्यांदेशमादेशमावहेंत्यावाहयत्यादिंप्लावयंन्नग्नआवहेतितुप्रथमदेवतांमाग्निंसोममित्याज्यभागांवग्निमग्नीषोमाविंतिपौर्णमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यामग्नीषोमयोःस्थानइंद्राग्नीअमावास्यायामसन्नयतइंद्रंमहेंद्रंवासंनयतौंतरेणहविषीविष्णुंमुपाश्वैतरेयिणोंग्नीषोमीयं
पौर्णमास्यौंवैष्णवममावास्यायांमेकेनैकेकंचनान्येषामप्युपांशूनांमावहस्वाहायाट्प्रियाधामानींदंहविर्महोज्यायइत्यु
क्त्वैर्येऽन्येतद्वचनाःपरोक्षास्तानुपांशूक्त्वैवींप्रत्यक्षमुपांशुंप्रतिचोदनमावाहनैसर्वाआदिश्यसकृदेकप्रदानास्तथोत्तरेषुनिग
मेष्वेकामिवसंस्तुयात्समानादेवतांसमानार्थींमव्यवहितांसकृन्निगमेष्वोह्वास्वावापिकासुंदेवाँऽआज्यपांआवहाग्निंहो
त्रायावहस्वंमहिमानमावहावहजातवेदःसुयजायजेत्यावाह्ययथास्थितमूर्ध्वजानुरुपविश्योंदग्वेदेर्व्युह्यतृणानिंभूमौप्रा
देशंकुर्यांददितिर्मातास्यांतरिक्षान्माच्छेत्सींरिदमहमग्निनादेवेनदेवतयात्रिवृतास्तोमेनरथंतरेणसान्नागायत्रेणछंदसा
ग्निष्टोमेनयज्ञेनवषट्कारेणवज्रेणयोस्मान्द्वेष्टियंचवयंद्विष्मस्तंहन्मीत्याश्रावयिष्यंतमनुमंत्रयेताश्राववयज्ञंदेवेष्वाश्रा
वयमांमनुष्येषुकीर्त्यैयशसेब्रह्मवर्चसायेतिप्रवृणानैंदेवसवितरेतंत्वावृणतेंग्निंहोत्रायसहपित्रावैश्वानरेणद्यावापृथिवी
मांपातामग्निर्होताहंमानुषइतिमानुषइत्यध्वर्योःश्रुत्वोंदायुषास्वायुषोदोषधीनांरसेनोत्पर्जन्यस्यधामभिरुदस्थाममृताँ
अन्वित्युत्तिष्ठेत्षष्टिश्चाध्वर्योनवतिश्चपाशाअग्निंहोतारमंतराविचृत्ताः ॥ सिनंतिपाकमतिधीरएतीत्युत्थायर्ऋतस्यपंथा
मन्वेमिहोतेत्यभिक्रम्यांसेध्वर्युमन्वारभेतपार्श्वस्थेनपाणिनाग्नीध्रमंकदेशेनसव्येनवैंद्रमन्वारभामहेहोतृवूर्येपुरोहितम् ।
येनायंनुत्तमंस्वर्देवाअंगिरसोदिवमितिसंमार्गतृणैस्त्रिरभ्यात्मंमुखंसंमृजीतसंमार्गोऽसिसंमाप्रजयापशुभिर्मृड्ढीतिसकृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्मंत्रेणद्विस्तूष्णींसर्वत्रैवंकर्मावृत्तौस्पृष्ट्वोदकंहोतृषदनमभिमंत्रयेताहेदैधिषव्योदतस्तिष्ठान्यस्यसदनेसीदयोस्मत्पाकत
रइत्यंगुष्ठोपकनिष्ठिकाभ्यांहोतृषदनात्तृणंप्रत्यग्दक्षिणानिरसेन्निरस्तःपरावसुरितीदमहमर्वावसोःसदनेसीदामीत्युपवि
शेद्दक्षिणोत्तरिणोपस्थेनैतेनिरसनोपवेशनेसर्वासनेषुसर्वेषामहरहःप्रथमोपवेशनेपिसमानेद्विरितिगौतमः ॥३॥ ब्रह्मौद
नेप्राशिष्यमाणेध्याधेयेब्रह्माबहिष्पवमानात्प्रत्येत्यसोमेप्रसृप्यहोतास्रुगादापनेपशौनपत्नीसांयाजिकेनान्यत्रहोतुरिति
कौत्सउपविश्यदेवबर्हिःस्वासस्थंत्वाध्यासदेयमित्यभिहिषहोतःप्रतरांबर्हिषद्धवेतिजानुशिरसाबर्हिरुपस्पृश्यातऊर्ध्वंज
पेद्भूपतयेनमोभुवनपतयेनमोभूतानांपतयेनमोभूतयेनमःप्राणंप्रपद्यापानंप्रपद्येव्यानंप्रपद्येवाचंप्रपद्येचक्षुःप्रपद्येश्रोत्रंप्र
पद्येमनःप्रपद्यआत्मानंप्रपद्येगायत्रींप्रपद्येत्रिष्टुभंप्रपद्येजगतींप्रपद्येनुष्टुभंप्रपद्येछंदांसिप्रपद्येसूर्योनोदिवस्पातुनमोमह
द्भ्योनमोअर्भकेभ्योविश्वेदेवाःशास्तनमायथेहाराधिहोतानिषदायजीयांस्तदद्यवाचःप्रथमंमसीयेतिसमाप्यप्रदीप्तइध्मे
स्रुचावादापयेन्निगदेनाग्निर्होतावेत्वग्नेर्होत्रंवेत्तुप्रावित्रंसाधुतेयजमानदेवतायोअग्निमित्यवसायहोतारमवृथाइतिजपे
दथसमापयेद्धृतवतीमध्वर्योस्रुचमास्यस्वदेवयुवंविश्ववारेईळामहेदेवाँईळेन्यान्नमस्यामनस्यान्यजामयज्ञियानितिस
मास्तेस्मिन्निगदेध्वर्युराश्रावयतिप्रत्याश्रावयेदाग्नीध्रउत्करदेशेतिष्ठन्स्फ्यमिध्मसन्नहनानीत्यादायदक्षिणामुखइतिशा
ट्यायनकमस्तुश्रौ३षळित्यौकारंप्लावयन् ॥ ४ ॥ प्रयाजैश्चरंतिपंचैतेभवंत्येकैकंप्रेषितोयजत्यागूर्याज्यादिरनुयाजव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्जीये३ यजामहइत्यागूर्वषट्कारोंत्यःसर्वत्रोच्चैस्तरांबलीयान्याज्यायास्तयोरादीष्टावयैद्याज्यांतंचविविच्यसंध्यक्षराणाम
कारैंनचेद्वैवचनोव्यंजनांतोवाविसर्जनीयोनत्यक्षरोपधोरिफ्यतइतश्चरेफीलुप्यतैरेफीप्रथमःस्वंतृतीयंनित्यंमकारैंये३
यजामहेसमिधःसमिधोअग्नआज्यस्यव्यंतू३वौ३षळितिवषट्कारइतिप्रथमोवागोजःसहओजोमयिप्राणापानाविंतिवष
ट्कारमुक्त्वोक्त्वानुमंत्रयतेंदिवाकीर्त्योवषट्कारंस्तथानुमंत्रणंमेतद्याज्यानिदर्शनैंतनूनपादग्नआज्यस्यवेत्वितिद्वितीयो
न्यत्रवसिष्ठशुनकात्रिवध्र्यश्वराजन्येभ्योनराशंसोअग्नआज्यस्यवेत्वितितेषांमिळोअग्नऽआज्यस्यव्यंत्वितितृतीयोबर्हिं
रग्नआज्यस्यवेत्वितिचतुर्थंआगूर्यपंचमैंस्वाहामुंस्वाहामुमितियथावाहितमनुद्रुत्यदेवतायथाचोदितमनावाहितास्वा
हादेवाआज्यपाजुषाणाअग्नआज्यस्यव्यंत्वित्यातोमंद्रेणोर्ध्वंचशंयुवाकान्मध्यमेनहवींष्यास्विष्टकृतंउत्तमेनशेषोग्निर्वृ
त्राणिजंघनदितिपूर्वस्याज्यभागस्यानुवाक्यात्वंसोमासिसत्पतिरित्युत्तरस्यजुषाणोअग्निराज्यस्यवेत्वितिपूर्वस्ययाज्या
जुषाणःसोमआज्यस्यहविषोवेत्वित्युत्तरस्यतावागूर्यादेशंयजतिसर्वाश्चानुवाक्यावत्योप्रैषाअन्याअन्वायात्याभ्यःसौ
मिकीभ्यश्चयाअंतरेणवैश्वानरीयैंपत्नीसंयाजांश्चैतौवार्त्रघ्नौपौर्णमास्यामनुवाक्यालिंगविशेषान्नामधेयान्यत्वैंततोविचा
रोनित्येयाज्यैंवृधन्वंतावमावास्यायामग्निःप्रत्नेनमन्मनासोमगीर्भिष्ट्वावयामेत्यातोवाग्यमनमंतराचयाज्यानुवाक्यैंनि
गदानुवचनाभिष्टवनशस्त्रजपानांचारभ्यासमाप्तैरन्यद्यज्ञस्यसाधनादापद्यातोदेवाअवंतुनइतिजपैंदपिवान्यांवैष्णवीं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५॥ उक्तादेवतास्तासांयाज्यानुवाक्यांअग्निर्मूर्धाभुवोयज्ञस्यायमग्निःसहस्रिणइतिवैदंविष्णुर्विचक्रमैत्रिर्देवःपृथिवीमे
षएतामग्नीषोमासवेदसायुवमेतानिदिविरोचनानींद्राग्नीअवसागतंगीर्भिर्विप्रःप्रमतिमिच्छमानएंद्रसानसिंरयिंप्रससा
हिषेपुरुहूतशत्रून्महाँऽइंद्रोयओजसाभुवस्त्वमिंद्रब्रह्मणामहानितिं यद्यग्नीषोमीयउपांशुयाजोऽग्नीषोमायोऽअद्यवामा
न्यंदिवोमातरिश्वाजभारेत्यथस्विष्टकृतःपिप्रीहिदेवांउशतोयविष्ठेत्यनुवाक्यायेऽयजामहेग्निंस्विष्टकृतंमयाळग्निरित्यु
क्त्वाषष्ठ्याविभक्त्यादेवतामादिश्यंप्रियाधामान्ययाळित्युपसंतनुयादेवमुत्तराअयाळयाळितित्वेवतासांपुरस्तादाज्य
पांतमनुक्रम्यदेवानामाज्यपानांप्रियाधामानियक्षदग्नेर्होतुःप्रियाधामानियक्षत्स्वंमहिमानमायजतामेज्याइषःकृणोतु
सोअध्वराजातवेदाजुषतांहविरग्नेयदद्यविशोअध्वरस्यहोतरित्यनवानंयजतिप्रकृत्यावा ॥ ६ ॥ प्रदेशिन्याःपर्वणीउत्तमे
अंजयित्वौष्ठयोरभ्यात्मंनिमार्ष्टिवाचस्पतिनातेहुतस्येषेप्राणायप्राश्नामीत्युत्तरमुत्तरेमनसस्पतिनातेहुतस्योर्जेऽपानाय
प्राश्नामीत्यधरमधरेस्पृष्ट्वोदकंमंजलिनेळांप्रतिगृह्यसव्येपाणौकृत्वापश्चादस्याउदगंगुलिंपाणिमुपधायावांतरेळामवदाप
यीतांतरेणांगुष्ठमंगुलीश्चस्वयंद्वितीयमाददीतंप्रत्यालब्धामंगुष्ठेनाभिसंगृह्यप्रत्याहृत्यांगुलीरमुष्टिंकृत्वादक्षिणतइळांप
रिगृह्यास्यसंमितामुपह्वयतेप्राणसंमितांवा ॥ इळोपहूतासहदिवाबृहतादित्येनोपास्मांइळाह्वयतांसहदिवाबृहतादित्ये
नेळोपहूतासहांतरिक्षेणवामदेव्येनवायुनोपास्माँइळाह्वयतांसहांतरिक्षेणवामदेव्येनवायुनेळोपहूतासहपृथिव्यारथंतरे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णाग्निनौपास्माँइळाह्वयतौसहपृथिव्यारथंतरेणाग्निना ॥ उपहूतागावःसहाशिरंउपमांगावःसहाशिराह्वयंतांमुपहूता धेनुःसहऋषभोपमांधेनुंःसहऋषभाह्वयतांमुपहूतागौर्घृतपद्युपमांगौर्घृतपदीह्वयतांमुपहूतादिव्याःसप्तहोतारंउपमांदि व्याःसप्तहोतारोह्वयंतांमुपहूतःसखाभक्षउपमांसखाभक्षोह्वयतांमुपहूतेळावृष्टिरुपमामिळावृष्टिर्ह्वयतामित्युपांश्वथो च्चैः । इळोपहूतोपहूतेळौपास्माँइळाह्वयतामिळोपहूता । मानवीघृतपदीमैत्रावरुणींब्रह्मदेवकृतमुपहूतंदैव्याअध्वर्य वंउपहूताउपहूतामनुष्याः । यइमंयज्ञमवान्येचयज्ञपतिंवर्धानुपहूतेद्यावापृथिवींपूर्वजेऋतावरीदेवीदेवपुत्रे ॥ उपहू तोयंयजमानउत्तरस्यांदेवयज्यायांमुपहूतोभूयसिहविष्करणइदंमेदेवाहविर्जुषंतामितितस्मिन्नुपहूतइत्युपहूयावांतरेळां प्राश्नीयादिळेभागंजुषस्वनःपिन्वगाजिन्वार्वतौरायस्पोषस्येशिषे तस्यनोरास्वतस्यनोदास्तस्यास्तेभागमशीमहि ॥ सर्वात्मानःसर्वतनवःसर्ववीराःसर्वपूरुषाःसर्वपुरुषाइतिवा ॥ ७ ॥ मार्जयित्वानुयाजैश्चरंतिपरिस्तरणैरंजलिमंतर्धा यापआसेचयतेतन्मार्जनंदेवादयोनुयाजावीतवत्पदांतास्त्रयएकैकंप्रेषितोयजति ॥ देवंबर्हिर्वसुवनेवसुधेयस्यवेतु । देवो नराशंसोवसुवनेवसुधेयस्यवेतु । देवोअग्निःस्विष्टकृत्सुद्रविणामंद्रःकविःसत्यमन्मायजीहोताहोतुर्होतुरायजीयानग्ने यांदेवानयाड्याँअपिप्रेर्येतेहोत्रेअमत्सतांससनुषींहोत्रांदेवंगमाँदिविदेवेषुयज्ञमेरयेमंस्विष्टकृच्चाग्नेहोताभूर्वसुवनेव सुधेयस्यनमोवाकेवीहीत्यनवानंवा ॥ ८ ॥ सूक्तवाकायसंप्रेषितइदंद्यावापृथिवीभद्रमभूंदार्ष्मसूक्तवाकंमुतनमोवाकं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मृध्यास्मसूक्तोच्यमग्नेत्वंसूक्तवागसि । उपश्रुतीदिवस्पृथिव्योरोमन्वतीतेस्मिन्यज्ञेयजमानंद्यावापृथिवीस्तां । शंगयी
जीरदानूअत्रस्नूअप्रवेदेउरुगव्यूतीअभयंकृतौ । वृष्टिद्यावारीत्यापांशंभुवौमयोभुवाऊर्जस्वतीपयस्वतीसूपचरणाचस्व
धिचरणाचतयोराविदीत्यवसायंप्रथमयाविभक्त्यादिश्यदेवतामिदंहविरजुषतावीवृधतंमहोज्यायोकृतेत्युपसंतनुयादे
वमुत्तराअक्रातामक्रतेतियथार्थमुक्तमुपांशोरावापिकांतमनुद्रुत्यदेवाआज्यपाआज्यमजुषंतांवीवृधंतमहोज्यायोऽक्रतां
ग्निर्होत्रेणेदंहविरजुषतांवीवृधतमहोज्यायोकृत । अस्यामृधेद्धोत्रायांदेवंगमायामाशास्तेयंयजमानोसावसावित्यस्यादि
श्यनामनीउपाँशुसन्निधौगुरोः ॥ आयुराशास्तेसुप्रजास्त्वमाशास्तेरायस्पोषमाशास्तेसजातवनस्यामाशास्तउत्तरांदेवय
ज्यामाशास्तेभूयोहविष्करणमाशास्तेदिव्यंधामाशास्तेविश्वंप्रियमाशास्तेयदनेनहविषाशास्तेतदश्यात्तद्दद्ध्यात्तदस्मैदे
वारासंतांतदग्निर्देवोदेवेभ्योवनतेवयमग्नेर्मानुषाः । इष्टंचवित्तंचोभेचनोद्यावापृथिवीअंहसस्पातामेहगतिर्वामस्येदं
नमोदेवेभ्यइति ॥ ९ ॥ शंयुवाकायसंप्रेषितंस्तच्छंयोरावृणीमहइत्याहानुवाक्यावदप्रणवांवेदमस्मैप्रयच्छत्यध्वर्युस्तं
गृह्णीयाद्वेदोसिवेदोविदेयेत्युदायुषेत्येतेनोपोत्थायपश्चाद्गार्हपत्यस्योपविश्यसोमंत्वष्टारंदेवानांपत्नीरग्निंगृहपतिमित्या
ज्येनयजैत्याप्यायस्वसमेतुतेसंतेपयांसिसमुयंतुवाजाइहत्वष्टारमग्रियंतन्नस्तुरीपमधपोषयित्नुंदेवानांपत्नीरुशतीरवंतु
नइतिद्वेअग्निर्होतागृहपतिःसराजाहव्यवाळग्निरजरःपितानइतिपत्नीसंयाजाअथप्रजाकामोराकांसिनीवालींकुहूमितिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राग्गृहपतेर्यजेतराकामहंसिनीवालिकुहूमहमितिद्वेद्वेयाज्यानुवाक्ये । कुहूमहंसुवृतौविघ्नापसमस्मिन्यज्ञेसुहवांजोहवीमि । सानोददातुश्रवणंपितृणांतस्यैतेदेविहविषाविधेम । कुहूर्देवानाममृतस्यपत्नीहव्यानोअस्यहविषःशृणोतु । संदाशुषेकिरतुभूरिवामंरायस्पोषंयजमानेदधात्वित्याज्यंपाणितलेवदापयीतेळामुपहूयसर्वाप्राश्नीयाच्छंयुवाकोभवेन्न वा ॥ १० ॥ वेदंपत्न्यैप्रदायवाचयेद्धोताध्वर्युर्वावेदोसिवित्तिरसिविदेयकर्मासिकरणमसिक्रियासंसनिरसिसनिता सिसनेयंघृतवंतंकुलायिनंरायस्पोषंसहस्रिणंवेदोददातुवाजिनं । यंबहवउपजीवंतियोजनानामसद्वशी । तंविदेयप्रजांविदेयकामायत्वेतिवेदशिरसानाभिदेशमालभेतप्रजाकामाचैदथास्यायोक्रंविचृतेत्प्रत्वामुंचामिवरुणस्यपाशादितिं तत्प्रत्यग्गार्हपत्याद्विगुणंप्राक्पाशंनिधायोपरिष्टादस्योदगग्राणिवेदतृणानिकरोतिपुरस्तात्पूर्णपात्रंसंश्लिष्टंवेदतृणैरभि मृश्यवाचयेत्पूर्णमसिपूर्णमेभूयाःसुपूर्णमसिसुपूर्णमेभूयाःसदसिसन्मेभूयाःसर्वमसिसर्वमेभूयाअक्षितिरसिमामेक्षेष्टाइ त्यथैनांपूर्णपात्रात्प्रतिदिशमुदकमुदुक्षन्नुदुक्षंतींवाचयतिप्राच्यांदिशिदेवाऋत्विजोमार्जयंतांदक्षिणस्यांदिशिमासाःपि तरोमार्जयंतांप्रतीच्यांदिशिगृहाःपशवोमार्जयंतांमुदीच्यांदिश्यापओषधयोवनस्पतयोमार्जयंतांमूर्ध्वायांदिशियज्ञःसं वत्सरःप्रजापतिर्मार्जयतांमार्जयंतामितिवाथास्याउत्तानमंजलिंमधस्ताद्योक्रस्यनिधायात्मनश्चसव्यंपूर्णपात्रंनिनयन्वा चयेन्माहंप्रजांपरासिचंयानःसयावरीस्थन । समुद्रेवोनिनयानिस्वंपाथोअपीथेतिवेदतृणान्यग्रेगृहीत्वाविधून्वंत्संततं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तृणंत्सव्येनगार्हपत्यादाहवनीयमेतिंतंतुंतन्वन्नजसोभानुमन्विहीतिशेषंनिधायप्रत्यगुदगाहवनीयादवस्थायस्थाल्याः
स्रुवेणादायसर्वप्रायश्चित्तानिजुहुयात्स्वाहाकारांतैर्मंत्रैर्नचेन्मंत्रेपठितोयत्किंचाप्रेषितोयजैदन्यत्राप्येवंभूतोव्यक्तहोमा
भ्याधानोपस्थानानिच । अयाश्चाग्नेस्यनभिशस्तीश्चसत्यमित्वमयाअसि । अयासावयसाकृतोयासन्हव्यमूहिषेयानो
धेहिभेषजंस्वाहा । अतोदेवाअवंतुनइतिद्वाभ्यांव्याहृतिभिश्चभूःस्वाहाभुवःस्वाहास्वःस्वाहाभूर्भुवःस्वःस्वाहेतिहुत्वा
संस्थाजपेनोपस्थायतीर्थेननिष्क्रम्यानियमओंचमेस्वरश्चमेयज्ञोपचतेनमश्च । यत्तेन्यूनंतस्मैतउपयत्तेतिरिक्तंतस्मैते
नमइतिसंस्थाजपइतिहोतुः ॥ ११ ॥ अथब्रह्मणोहोत्राचमनयज्ञोपवीतशौचानिनित्यःसर्वकर्मणादक्षिणतोध्रुवाणांव्र
जतांवाबहिर्वेदियांदिशंव्रजेयुःसैवतत्रप्राचीचेष्टास्वमंत्रासुस्थानासनयोर्विकल्पस्तिष्ठद्धोमाश्चयेवषट्कारआसीतान्य
त्रसमस्तपाण्यंगुष्ठोग्रेणाहवनीयंपरीत्यदक्षिणतःकुशेषूपविशेद्बृहस्पतिर्ब्रह्माब्रह्मसदनआशिष्यतेबृहस्पतेयज्ञंगोपायेत्यु
पविश्यजपेदेषब्रह्मजपःसर्वयज्ञतंत्रेषुसाग्नौयत्रोपवेशनंमुपविष्टमतिसर्जयतेब्रह्मन्नपःप्रणेष्यामीतिश्रुत्वाभूर्भुवःस्वर्बृह
स्पतिप्रसूतइतिजपित्वौ३प्रणयेत्यतिसृजेत्सर्वत्रयथाकर्मत्वादेशाःप्रणवाद्युच्चैरूर्ध्ववाप्रणवादंतऊर्ध्ववाग्यतआस्तआह
विष्कृतंउद्वादनादामार्जनात्पशौसोमेघर्मादिचातिप्रैषादिचासुब्रह्मण्यायाःप्रातरनुवाकाद्यांतर्यामाद्धरिवतोनुसवनंमे
ळायाःस्तोत्रेष्वतिसर्जनाद्यावषट्कारादोहचःपवमानेषुयच्चकिंचमंत्रवद्धोत्राशेषआपत्तिश्चयत्रत्वग्निःप्रणीयतेपिससोमै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदादितत्रवाग्यमनँदक्षिणतश्चत्रजन्जपत्याशुःशिशानइतिसूक्तंसमाप्योपवेशनाद्युक्तँनतुसौमिकेप्रणयनेब्रह्मजपोन्यत्र
विसृष्टवागबहुभाषींयज्ञमनाविपर्यासेंतरितेमंत्रेकर्मणिंवाख्यातेवोपलक्ष्यवाजान्वाच्याहुतिंजुहुयादृक्तश्चेद्भूरितिगार्ह
पत्यैयजुष्टोभुवइतिदक्षिणआग्नीध्रीयैसोमेषुसामतःस्वरित्याहवनीयैसर्वतोविज्ञातेवाभूर्भुवःस्वरित्याहवनीयएवंप्राक्प्र
याजेभ्योंगारंबहिष्परिधिनिर्वृत्तैस्रुवदंडेनाभिनिदध्यान्मातपोमायज्ञस्तपन्मायज्ञपतिस्तपन्नमस्तेअस्त्वायतैनमोरुद्रप
रायते । नमोयत्रनिषीदसीत्यमुंमाहिंसीरमुंमाहिंसीरितिचंप्रतिदिशमध्वर्युयजमानौपुरस्ताच्चेद्ब्रह्मयजमानोदक्षिणतो
होतृपत्नीयजमानान्पश्चादाग्नीध्रयजमानाउत्तरतोथैनमनुप्रहरेदाहंयज्ञंददेनिर्ऋतेरुपस्थात्तंदेवेषुपरिददामिविद्वान् ।
सुप्रजास्त्वंशतहिमामदंतइहनोदेवामयिशर्मयच्छतेतितमभिजुहुयात्सहस्रशृंगोवृषभोजातवेदाःस्तोमपृष्ठोघृतवान्सुप्र
तीकः । मानोहिंसीद्धिंसितोनेत्वाजहामिगोपोषंचनोवीरपोषंचयच्छस्वाहेति ॥ १२ ॥ प्राशित्रमाद्रियमाणमीक्षतेमि
त्रस्यत्वाचक्षुषाप्रतीक्षइतिदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामीतितदंजलिनाप्रतिगृह्यपृथि
व्यास्त्वानाभौसादयाम्यदित्याउपस्थइतिकुशेषुप्राग्दंडंनिधायगुंष्ठोपकनिष्ठिकाभ्यांमसंखादन्प्राश्नीयादग्नेष्ट्वास्येनप्रा
श्नामिबृहस्पतेर्मुखेनेत्याचम्यान्वाचामेत्सत्येनत्वाभिजिघर्मीयाअप्स्वंतर्देवतास्ताइदंशमयंतुचक्षुःश्रोत्रंप्राणान्मेमाहिं
सीरितींद्रस्यत्वाजठरेदधामीतिनाभिमालभेतंप्रक्षाल्यप्राशित्रहरणेत्रिरनेनाभ्यात्ममपोनिनयतेमार्जयित्वास्मिन्ब्रह्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भागंनिदध्यात्पश्चात्कुशेषुयजमानभागमन्वाहार्यमवेक्षेतंप्रजापतेर्भागोस्यूर्जस्वान्पयस्वानक्षितिरसिमामेक्षेष्ठाअस्मिंश्च लोकेमुष्मिंश्चप्राणापानौमेपाहिकामायत्वेत्यस्पृशन्नवघ्रायाँगुष्ठोपकनिष्ठिकाभ्यांशिष्टंगृहीत्वाब्रह्मभागेनिदध्याद्ब्रह्मन्प्र स्थास्यामइतिश्रुत्वाबृहस्पतिर्ब्रह्माब्रह्मसदनआशिष्टबृहस्पतेयज्ञमजूगुपःसयज्ञंपाहिसयज्ञपतिंपाहिसमांपाहिभूर्भुवःस्व र्बृहस्पतिप्रसूतइतिजपित्वोंऽप्रतिष्ठेतिसमिधमनुजानीयात्संस्थितेजघन्यऋत्विजांसर्वप्रायश्चित्तानिजुहुयात्तमितरेन्वा लभेरन्होतारंवैतयोर्नित्यहोमःसर्वेसंस्थाजपेनोपतिष्ठंतउपतिष्ठंते ॥ १३ ॥ इत्याश्वलायनश्रौतसूत्रेप्रथमोऽध्यायः ॥ १ ॥

ॐ३म् ॥ पौर्णमासेनेष्टिपशुसोमाउपदिष्टास्तैरमावास्यायांपौर्णमास्यांवायजेतराजन्यश्चाग्निहोत्रंजुहुयात्तपस्विने ब्राह्मणायेतरंकालंभक्तमुपहरेद्दतसत्यशीलःसोमसुत्सदाजुहुयाद्बहुषुबहूनामनुदेशआनंतर्ययोगोंद्वेद्वेतुयाज्यानुवाक्ये अदृष्टादेशेनित्येंअग्न्याधेयंकृत्तिकासुरोहिण्यांमृगशिरसिफल्गुनीषुविशाखयोरुत्तरयोःप्रोष्ठपदयोरेतेषांकस्मिंश्चिद्वसंते पर्वणिब्राह्मणआदधीतग्रीष्मवर्षाशरत्सुक्षत्रियवैश्योपक्रुष्टायस्मिन्कस्मिंश्चिदृतावादधीतसोमेनयक्ष्यमाणोनर्तुपृच्छेन्न नक्षत्रमश्वत्थाच्छमीगर्भादरणीआहरेदनपेक्षमाणोयोअश्वत्थःशमीगर्भेआरुरोहत्वेसचा । तंत्वाहरामिब्रह्मणायज्ञियैः केतुभिःसहेतिपूर्णाहुत्यंतमग्न्याधेयंयदित्विष्टयस्तनुयुःप्रथमायामग्निरग्निःपवमानोग्नआयूंषिपवसेग्नेपवस्वस्वपाःसहव्य वाळमत्योग्निर्होतापुरोहितइतिस्विष्टकृतःसंयाज्येइत्युक्तेसौविष्टकृतीप्रतीयात्सर्वत्रदेवतागमेनित्यानामपायोयाःस्विष्ट

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृतमंतराज्यभागौचतास्तत्स्थानंएषसमानजातिधर्मोद्वितीयस्यांवृधन्वंतावग्निःपावकोग्निःशुचिःसनःपावकदीदिवोग्ने
पावकरोचिषा । अग्निःशुचिव्रततमंउदग्नेशुचयस्तवंसाह्वान्विश्वाअभियुजोग्निमीळेपुरोहितमितिसंयाज्यैतृतीयस्यांसा
मिधेन्यावावपतेंप्रागुपोत्तमायाःपृथुपाजाअमर्त्यइतिद्वेधाय्येइत्युक्तएतेप्रतीयात्पुष्टिमंतावग्निनारयिमश्नवद्वयस्फानो
अमीवहेत्यग्नीषोमाविंद्राग्नीविष्णुरितिवैकल्पिकान्यदितिरुतत्वामदितेमहिंमहीमूषुमातरंसुव्रतानांमृतस्यपत्नीमवसेहु
वेम । तुविक्षत्रामजरंतीमुरूचींसुशर्माणमदितिंसुप्रणीतिं । प्रेद्धोअग्नइमोअग्नइतिसंयाज्यैविराजावित्युक्तएतेप्रतीयादि
तितिस्रआद्योत्तमेवैवस्यातांमाद्यावातथासतितस्यामेवधाय्येविराजांवितिमात्रेविकारैर्वैराजतंत्रेतिप्रतीयादाधानाद्वा
दशरात्रमजस्रांअत्यंतंतुगतश्रियः ॥ १ ॥ उत्सर्गेपराह्णेगार्हपत्यंप्रज्वल्यदक्षिणाग्निमानीयविट्कुलाद्वित्तवतोवैकयोनय
इत्येकेध्रियमाणंवाप्रज्वल्यारणिमंतंवामथित्वागार्हपत्यादाहवनीयंज्वलंतमुद्धरेद्देवंत्वादेवेभ्यःश्रियाउद्धरामीत्युद्धरे
दुद्ध्रियमाणउद्धरपाप्मनोमायदविद्वान्यच्चविद्वांश्चकार । अह्नायदेनःकृतमस्तिकिंचित्सर्वस्मान्मोद्धृतःपाहितस्मादिति
प्रणयेदमृताहुतिममृतायांजुहोम्यग्निंपृथिव्याममृतस्ययोनौ । तयानंतंकाममहंजयानिंप्रजापतिःप्रथमोयंजिगायाग्ना
वग्निःस्वाहेतिनिदध्यादादित्यमभिमुखंएवंप्रातर्व्युष्टायांतमेवाभिमुखोरात्र्यायदेनइतितुप्रणयेदतऊर्ध्वमाहिताग्निर्व्रत
चार्याहोमादनुदितहोमीचोदयादस्तमितेहोमोनित्यमाचमनंमृतसत्याभ्यांत्वापर्युक्षामीतिजपित्वापर्युक्षेत्त्रिस्त्रिरेकैकंपु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नःपुनरुदकमादायानंतर्येविकल्पोदक्षिणंत्वेवप्रथमंविज्ञायतेपितावाएषोग्नीनांयद्दक्षिणःपुत्रोगार्हपत्यःपौत्रआहवनीय
स्तस्मादेवंपर्युक्षेद्गार्हपत्यादविच्छिन्नामुदकधारांहरैत्तंतुंतन्वन्नजसोभानुमन्विहीत्याहवनीयात्पश्चाद्गार्हपत्यस्योपविश्यो
दगंगारानपोहैत्सुहुतकृतस्थसुहुतंकरिष्यथेतितेष्वग्निहोत्रमधिश्रयैदधिश्रितमध्यधिश्रितमधिश्रितंहिँ ३इति। इळाया
स्पदंघृतवच्चराचरैंजातवेदोहविरिदंजुषस्व । येग्राम्याःपशवोविश्वरूपास्तेषांसप्तानांमयिपुष्टिरस्त्वितिवानदध्यधिश्रये
दधिश्रयेदित्येके ॥२॥ पयसानित्यहोमोंयवागूरोदनोदधिसर्पिंर्ग्रामकामान्नाद्यकामैंद्रियकामतेजस्कामानांमधिश्रितम
वज्वलयैंदनधिश्रयंदध्यग्निष्टेतेजोमाहार्षीरितिस्रुवेणप्रतिषिंच्यान्नवांशांतिरस्यमृतमसीतितयोरव्यतिचारंःपुनर्ज्वलता
परिहरेत्रिरंतरितंरक्षोंतरिताअरातयइतिसमुदंतंकर्षन्निवोदगुद्वासयैद्दिवेत्वांतरिक्षायत्वांपृथिव्यैत्वेतिनिदधत्सुहुतकृत
स्थसुहुतमकार्ष्टैत्यंगारानतिसृज्यस्रुक्स्रुवंप्रतितपेत्प्रत्युष्टंरक्षःप्रत्युष्टाअरातयोनिष्टप्तंरक्षोनिष्टप्ताअरातयइत्युत्तरतः
स्थाल्याःस्रुचमासाद्योमुन्नयानीत्यतिसर्जयीताहिताग्निराचम्यापरेणवेदिमतिव्रज्यदक्षिणतउपविश्यैतच्छ्रुत्वोमुन्नयेत्य
तिसृजैदतिसृष्टोभूरिळाभुवइळास्वदिळावृधइळेतिस्रुवपूरमुन्नयैदग्रियमग्रियंपूर्णतमंयोनुज्येष्ठमृद्धिमिच्छैत्पुत्राणांयो
स्यपुत्रःप्रियःस्यात्तंप्रतिपूर्णमुन्नयैत्स्थालीमभिमृश्यसमिधंस्रुचंचाध्यधिगार्हपत्यंहृत्वाप्राणसंमितामाहवनीयसमीपैंकुशे
षूपसाद्यजान्वाच्यसमिधमादध्याद्रजतांत्वाग्निज्योतिषैरात्रिमिष्टकामुपदधेस्वाहेतिसमिधमाधायैविद्युदसिविद्यमेपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्मानंमग्नौश्रद्धेत्यपउपस्पृश्यप्रदीप्तांङ्गुंगुलमात्रेभिजुहुयाद्भूर्भुवःस्वरो३मग्निर्ज्योतिर्ज्योतिरग्निःस्वाहेतिपूर्वामाहुतिंहु
त्वाकुशेषुसादयित्वागार्हपत्यमवेक्षेतपशून्मेयच्छेत्यथोत्तरांतूष्णींभूयसीमसंसृष्टांप्रागुदगुत्तरतोवाप्रजापतिंमनसाध्या
यांत्तूष्णींहोमेषुसर्वत्रंभूयिष्ठंस्रुचिशिष्ट्वांत्रिरनुप्रंकंप्यावमृज्यंकुशमूलेषुनिमार्ष्टिपशुभ्यस्त्वेतितेषांदक्षिणतउत्तानाअंगु
लीःकरोतिप्राचीनावीतींतूष्णींस्वधापितृभ्यइतिवापोवनिनीयंवृष्टिरसिवृश्चमेपाप्मानंमप्सुश्रद्धेत्यपउपस्पृश्याहिताग्निर
नुमंत्रयेताधानमुक्त्वातेनऋषिणातेनब्रह्मणातयादेवतयांगिरस्वद्ध्रुवासीदेतिसमिधंताअस्यसूददोहसइतिपूर्वामाहुति
मुपोत्थायोत्तरांकांक्षेतेक्षमाणोभूर्भुवःस्वःसुप्रजाःप्रजाभिःस्यांसुवीरोवीरैःसुपोषःपोषैराग्नेयीभिश्चान्नआयूंषिपवसइति
तिसृभिः ॥ ३ ॥ संवत्सरेसंवत्सरेयवाग्वापयसावास्वयंपर्वणिजुहुयादत्विजामेकइतरंकालंमंतेवासीवास्पृष्ट्वोदकंमुद
ङ्गावृत्यभक्षयेदपरयोर्वाहुत्वायुषेत्वाप्राश्नामीतिप्रथमंमन्नाद्यायत्वेत्युत्तरंतूष्णींसमिधमाधायाग्नयेगृहपतयेस्वाहेतिगार्ह
पत्येनित्योत्तरांतूष्णींसमिधमाधायाग्नयेसंवेशपतयेस्वाहेतिदक्षिणेग्नयेन्नादायान्नपतयेस्वाहेतिवानित्योत्तराभक्षयित्वा
भ्यात्ममपःस्रुचानिनयतेत्रिःसर्पदेवजनेभ्यःस्वाहेत्यथैनांकुशैःप्रक्षाल्यचतस्रःपूर्णाःप्रागुदीच्योर्निनयेदृतुभ्यःस्वाहादि
ग्भ्यःस्वाहासप्तऋषिभ्यःस्वाहेतरजनेभ्यःस्वाहेतिपंचमींकुशदेशेपृथिव्याममृतंजुहोम्यग्नयेवैश्वानरायस्वाहेतिषष्ठींपश्चा
द्गार्हपत्यस्यप्राणममृतेजुहोम्यमृतंप्राणेजुहोमिस्वाहेतिप्रताप्यांतर्वेदिनिदध्यात्परिकर्मिणेवाप्रयच्छेदग्रेणाहवनीयंपरी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यसमिधआदध्यात्तिस्रस्तिस्रउदञ्चुखस्तिष्ठन्प्रथमांसमंत्रांमाहवनीयेदीदिहीतिगार्हपत्येदीदायेतिदक्षिणेदीदिदायेत्यु
क्तंपर्युक्षणंताभ्यांपरिसमूहनेपूर्वेतुपर्युक्षणादेवंप्रातरुपोदयंव्युषितउदितेवासत्यक्रताभ्यांत्वेतिपर्युक्षणंमोमुन्नेष्यामीत्य
तिसर्जनंहरिणींत्वासूर्यज्योतिषंमहरिष्टकामुपदधेस्वाहेतिसमिदाधानंभूर्भुवःस्वरों३सूर्योज्योतिर्ज्योतिःसूर्यःस्वाहेति
होमउन्मार्जनंच ॥ ४ ॥ प्रवत्स्यन्नग्नीन्प्रज्वल्याचम्यातिक्रम्योपतिष्ठतंआहवनीयंशंस्यपशून्मेपाहीतिगार्हपत्यंनर्यप्रजां
मेपाहीतिदक्षिणंमथर्वपितुंमेपाहीतिगार्हपत्याहवनीयावीक्षेतेमान्मेमित्रावरुणौगृहान्गोपायतंयुवं ॥ अविनष्टानविह
तान्पूषैनानभिरक्षत्वस्माकंपुनरायनादितियथेतंप्रत्येत्यप्रदक्षिणंपरियन्नाहवनीयमुपतिष्ठते । ममनामप्रथमंजातवेदः
पितामाताचदधतुर्यदग्रे ॥ तत्त्वंबिभृहिपुनराममैतौस्तवाहंनामबिभराण्यग्नइतिप्रव्रजेदनपेक्षमाणोमाप्रगामेतिसूक्तंज
पन्नारादग्निभ्योवाचंविसृजेतेसदासुगःपितुमांअस्तुपंथाइतिपंथानमवरुह्यानुपस्थिताग्निश्चैत्यवासमापद्येतेहैवसंतत्रसं
तंत्वाग्नेहृदावाचामनसावाबिभर्मि ॥ तिरोमासंतंमाप्रहासीज्योतिषात्वावैश्वानरेणोपतिष्ठतइतिप्रतिदिशमग्नीनुपस्था
यापिपंथामगन्महीतिप्रत्येत्यसमित्पाणिर्वाग्यतोग्नीन्ज्वलतःश्रुत्वाभिक्रम्याहवनीयमीक्षेतविश्वदानींमारभेतोनातुरेण
मनसा ॥ अग्नेमातेप्रतिवेशारिषाम ॥ नमस्तेअस्तुमीढुषेनमस्तउपसद्यनै ॥ अग्नेशुंभस्वतन्वःसंमारय्यासृजेत्यग्निषुस
मिधउपनिधायाहवनीयमुपतिष्ठते । ममनामतवचजातवेदोवाससीइववसानोचरावः ॥ तेबिभृवोदक्षसेजीवसे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चयथायथंनौतन्वौजातवेदइतिततःसमिधोभ्यादध्यादाहवनीये । अगंन्मविश्ववेदसमस्मभ्यंवसुवित्तमं । अग्नेसम्राळभिद्युम्नमभिसहआयच्छस्वस्वाहेतिगार्हपत्येयमग्निर्गृहपतिर्गार्हपत्यःप्रजायावसुवित्तमः ॥ अग्नेगृहपतेभिद्युम्नमभिसहआयच्छस्वस्वाहेतिदक्षिणेयमग्निःपुरीष्योरयिमान्पुष्टिवर्धनः ॥ अग्नेपुरीष्याभिद्युम्नमभिसहआयच्छस्वस्वाहेतिगार्हपत्याहवनीयावीक्षेतेमान्मेमित्रावरुणौगृहानजूगुपतंयुवं ॥ अविनष्टानविहृतान्पूषैनानभ्यराक्षीदास्माकंपुनरायनादितियथेतंप्रत्येत्यप्रोष्यभूयोदशरात्राच्चतुर्गृहीतमाज्यंजुहुयान्मनोज्योतिर्जुषतामाज्यंमेविच्छिन्नंयज्ञंसमिमंदधातु ॥ याइष्टाउषसोयाअनिष्टास्तासंतनोमिहविषाघृतेनस्वाहेत्यग्निहोत्राहोमेचप्रतिहोममेकैपरिसमुह्योदग्विहारादुपविश्यभूर्भुवःस्वरितिवाचंविसृजेतंगृहानीक्षेताप्यनाहिताग्निर्गृहामाबिभीतोपवःस्वस्त्येवोस्मासुचप्रजायध्वैमाचवोगोपतीरिषदितिप्रपद्येतंगृहानहंसुमनसःप्रपद्येवीरघ्नोवीरवतःसुवीरान् ॥ इरांवहंतोघृतमुक्षमाणास्तेष्वहंसुमनाःसंविशानीतिंशिवंशग्मंशंयोःशंयोरितित्रिरनुवीक्षमाणोविदितमप्यलीकैनतदहर्ज्ञापयेयुर्विज्ञायतेभयंवोभयंमेस्त्वित्येवोपतिष्ठेतंप्रवसन्प्रत्येत्याहरहर्वेति ॥ ५ ॥ अमावास्यायामपराह्णेपिंडपितृयज्ञोदक्षिणाग्नेरेकोल्मुकंप्राग्दक्षिणाप्रणयेद्येरूपाणिंप्रतिमुंचमानाअसुराःसंतःस्वधयाचरंति ॥ परापुरोनिपुरोयेभरंत्यग्निष्टाल्लोकात्प्रणुदात्वस्मादितिसर्वकर्माणितांदिशमुपसमाधायोभौपरिस्तीर्यदक्षिणाग्नेःप्रागुदक्प्रत्यगुदग्वैकैकशःपात्राणिसादयेच्चरुस्थालिशूर्पस्फ्योलूखलमुसलं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्रुवध्रुवकृष्णाजिनंसकृदाच्छिन्नेध्ममेक्षणकमंडलून्दक्षिणतोग्निष्ठमारुह्यचरुस्थालींव्रीहीणांपूर्णांनिमृजेत्परिसन्नान्निद
ध्यात्कृष्णाजिनउलूखलंकृत्वेतरान्पल्ययवहन्यादविवेचमवहतान्सकृत्प्रक्षाल्यदक्षिणाग्नौश्रपयेदर्वागतिप्रणीतात्स्फ्येन
लेखामुल्लिखेदपहताअसुरारक्षांसिवेदिषदइतितामभ्युक्ष्यसकृदाच्छिन्नैरवस्तीर्यासादयेदभिघार्यस्थालीपाकंमाज्यंसर्पि
रनुत्पूतंनवनीतंवोत्पूतंध्रुवायामाज्यंकृत्वादक्षिणतआंजनाभ्यंजनंकशिपूपबर्हणानिंप्राचीनावीतीध्ममुपसमाधायमेक्ष
णेनादायावदानसंपदाजुहुयात्सोमायपितृमतेस्वधानमोग्नयेकव्यवाहनायस्वधानमइतिस्वाहाकारेणवाग्निंपूर्वंयज्ञोप
वीतीमेक्षणमनुप्रहृत्यप्राचीनावीतीलेखांत्रिरुदकेनोपनयेच्छुंधंतांपितरःशुंधंतांपितामहाःशुंधंतांप्रपितामहाइतितस्यां
पिंडान्निपृणीयात्पराचीनपार्णिःपित्रेपितामहायप्रपितामहायैतत्तेसौयेचत्वामत्रान्वितंतस्मैतस्मैयएषांप्रेताःस्युरिति
गाणगारिःप्रत्यक्षमितरानर्चयेत्तदर्थत्वात्प्रेतेभ्यएवनिपृणीयादितितौल्वलिःक्रियागुणत्वादपिजीवांतआत्रिभ्यःसर्वे
भ्यएवनिपृणीयादितिगौतमःक्रियाह्यर्थकारितोपायविशेषोजीवमृतानांनपरेभ्योऽनधिकारान्नप्रत्यक्षंनजीवेभ्योनिपृ
णीयान्नजीवांतर्हितेभ्योजुहुयाज्जीवेभ्यःसर्वहुतंसर्वजीविनोनामान्यविद्वाँस्ततपितामहप्रपितामहेति॥६॥निपृताननुमं
त्रयेताऽत्रपितरोमादयध्वंयथाभागमावृषायध्वमितिसव्यावृदुदङ्मावृत्यंयथाशक्त्यप्राणन्नासित्वाभिपर्यावृत्यामीमदंत
पितरोयथाभागमावृषायीषतेतिचरोःप्राणभक्षंभक्षयेन्नित्यंनिनयनंमसावभ्यंक्ष्वासावंक्ष्वेतिपिंडेष्वभ्यंजनांजनेवासोद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्यांद्दशामूर्णास्तुकांवांपंचाशद्धर्षतायाऊर्ध्वस्वंल्लोमैतद्वःपितरोवासोमानोतोन्यत्पितरोयुङ्ग्ध्वमित्यथैनानुपतिष्ठेतंन
मोवःपितरइषैनमोवःपितरऊर्जेनमोवःपितरःशुष्मायनमोवःपितरोघोरायनमोवःपितरोजीवायनमोवःपितरोरसाय ।
स्वधावःपितरोनमोवःपितरोनमएतायुष्माकंपितरइमाअस्माकंजीवावोजीवंतइहसंतःस्याम । मनोन्वाहुवामहइतिच
तिसृभिरथैनान्प्रवाहयेत्परेतनपितरःसोम्यासोगंभीरेभिःपथिभिःपूर्विणेभिः ॥ दत्त्वायास्मभ्यंद्रविणेहभद्ररायिंचनः
सर्ववीरंनियच्छतेत्यग्निंप्रत्येयादग्नेतमद्याश्वंनस्तोमैरितिगार्हपत्यंयदंतरिक्षंपृथिवीमुतद्यांयन्मातरंपितरंवाजिहिंसिम ।
अग्निर्मातस्मादेनसोगार्हपत्यःप्रमुंचतुकरोतुमामनेनसं ॥ वीरंमेदत्तपितरइतिपिंडानांमध्यमंपत्नींप्राशयेदाधत्तपितरो
गर्भंकुमारंपुष्करस्रजं ॥ यथायमरपाअसदित्यप्स्वितरावतिप्रणीतेवायस्यवागंतुरंनकाम्याभावःसप्राश्नीयान्महारोगे
णवाभितप्तःप्राश्नीयादन्यतरांगतिंगच्छेत्येवमनाहिताग्निर्निर्त्येश्रपयित्वातिप्रणीयजुहुयाद्विवत्पात्राणामुत्सर्गंस्तृणंद्वि
तीयमुद्रिक्ते ॥७॥ दर्शपूर्णमासावारप्स्यमानोऽन्वारंभणीयामग्नाविष्णूसरस्वतीसरस्वानग्निर्भगी ॥ अग्नाविष्णूसजो
षसेमावर्धंतुवांगिरः ॥ द्युम्नैर्वाजेभिरागतं । अग्नाविष्णूमहिधामप्रियंवांवीथोघृतस्यगुह्याजुषाणा ॥ दमेदमेसुष्टुतिर्वा
मियानाप्रतिवांजिह्वाघृतमुच्चरण्यत् ॥ पावकानःसरस्वतीपार्वारवीकन्याचित्रायुःपीपिवांसंसरस्वतोदिव्यंसुपर्णंवाय
संबृहंतंमासवंसवितुर्यथासनोराधांस्याभरेत्याधानाद्यद्यामायवीयदिवार्थाव्यथेरंन्पुनराधेयइष्टिंस्तस्यांप्रयाजानुयाजा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्विभक्तिभिर्यजेत्समिधःसमिधोग्नेग्नआज्यस्यव्यंतु । तनूनपादग्निमग्नआज्यस्यवेत्विळोअग्निनाग्नआज्यस्यव्यंतु ।
बर्हिरग्निरग्नआज्यस्यवेत्वितिसमिधाग्निंदुवस्यतेह्यूषुब्रवाणितइत्याग्नेयावाज्यभागौबुद्धिमदिंदुमंताविंत्याचक्षतेतथानु
वृत्तिरिज्याचंनित्यंपूर्वमनुब्राह्मणिनोग्नआयूंषिपवसइत्युत्तरैंनित्यस्तूत्तरेहविःशब्दंआग्नेयंहविंरधाह्यग्नेक्रतोर्भद्रस्याभि
ष्टेअद्यगीर्भिर्गृणंतएभिर्नोअर्कैंरग्नेतमद्याश्वंनस्तोमैरितिसंयाज्येदेवंबर्हिरग्नेर्वसुवनेवसुधेयस्यवेतु ॥ देवोनराशंसोग्नौव
सुवनेवसुधेयस्यवेत्विति ॥ ८ ॥ आग्रयणंव्रीहिश्यामाकयवानांसस्यंनाश्नीयादग्निहोत्रमहुत्वायदावर्षस्यतृप्तस्यादथा
ग्रयणेनयजेतापिहिदेवाआहुस्तृप्तोनूनंवर्षस्याग्रयणेनहियजतइत्यग्निहोत्रींवैनानादयित्वातस्याःपयसाजुहुयादपिवा
क्रियायवेष्विष्टिस्तुराज्ञःसर्वेषांचैकैश्यामाकेष्वांसौम्यश्चरुः सोमयास्तेमयोभुवोयातेधामानिदिवियापृथिव्यामित्यवां
तरेळायानित्यंजपमुक्त्वासव्येपाणौकृत्वैतरेणाभिमृशेत्प्रजापतयेत्वाग्रहंगृह्णामिमह्यंश्रियैमह्यंयशसेमह्यमन्नाद्याय ॥
भद्रान्नःश्रेयःसमनैष्टदेवास्त्वयावसेनसमशीमहित्वा ॥ सनोमयोभूःपितवाविशेहशंनोभवद्विपदेशंचतुष्पदइतिप्राश्या
चर्म्यनाभिमालभेतामोसिप्राणतद्दतंब्रवीर्म्यमासिसर्वानसिप्रविष्टः ॥ समेजरांरोगमपनुद्यशरीरादमामएधिमामृथा
मइंद्रेत्येतेनभक्षिणोभक्षान्सर्वत्रनवभोजनेथव्रीहियवानांधाय्येविराजावग्नींद्राविंद्राग्नीवाविश्वेदेवाःसोमोयदितत्रश्या
माकोद्यावापृथिवी आघायेअग्निमिंधतेसुकर्माणःसुरुचोदेवयंतोविश्वेदेवासआगतयेकेचज्मामहिनोअहिमायां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महीद्यौःपृथिवीचनःप्रपूर्वजेपितरानव्यसीभिरिति ॥ ९ ॥ अथकाम्याआयुष्कामेष्टयांजीवातुमंतावानोअग्नेसु
चेतुनात्वंसोममहेभगमित्यग्निरायुष्मानिंद्रस्त्रातायुष्टेविश्वतोदधदयमग्निर्वरेण्यः ॥ पुनस्तेप्राणआयातुपरायक्ष्मंसु
वामिते ॥ आयुर्दाअग्नेहविषोजुषाणोघृतप्रतीकोघृतयोनिरेधि ॥ घृतंपीत्वामधुचारुगव्यंपितेवपुत्रमभिरक्षतादिमं ॥
त्रातारमिंद्रमवितारमिंद्रंमातेअस्यांसहसावन्परिष्टौपाहिनोअग्नेपायुभिरजस्रैरग्नेत्वंपारयानव्योअस्मानितिसंयाज्ये
स्वस्त्ययन्यारक्षितवंतावग्नेरक्षाणोअंहसस्त्वंनःसोमविश्वतइत्यग्निःस्वस्तिमान्स्वस्तिनोदिवोअग्नेपृथिव्याआरेअस्म
दमतिमारेअंहइतिपूर्वयोक्तेसंयाज्येपुत्रकामेष्टयामग्निःपुत्रीयस्मैत्वंसुकृतेजातवेदोयस्त्वाहृदाकीरिणामन्यमानोग्निस्तु
विश्रवस्तममितिद्वेसंयाज्येआग्नेय्याउत्तरेनित्येमूर्धन्वतस्तुभ्यंताअंगिरस्तमाश्यामतंकाममग्नेतवोतीतिकामायवैमृध्या
उत्तरेविनइंद्रमृधोजहि मृगोनभीमःकुचरोगिरिष्ठाःसघुत्तिमिंद्रसच्युतिंप्रच्युतिंजघनच्युतिं ॥ प्रनाकाफानआभर ॥
प्रयप्स्यन्निवसक्थ्यौविनइंद्रमृधोजहि ॥ जनीखुदद्यथासफंमभिनःसुष्टुतिंनयेतींद्रायदात्रेपुनर्दात्रेवायानिनोधनानि
क्रुद्धोजिनासिमन्युना ॥ इंद्रानुविद्धिनस्तान्यनेनहविषापुनः ॥ पुनर्नइंद्रोमघवाददातुधनानिशक्रोधनीःसुराधाः ॥
अस्मद्व्यक्रृणुतांयाचितोमनःश्रुष्टीनइंद्रोहविषामृधातीत्याशानामाशापालेभ्योवाशानामाशापालेभ्यश्चतुर्भ्योअमृते
भ्यः ॥ इदंभूतस्याध्यक्षेभ्योविधेमहविषावयं ॥ विश्वाआशामधुनासंसृजाम्यनमीवाआपओषधयःसंतुसर्वाः ॥ अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यंयजमानोमृधोव्यस्यत्वगृभीताःपशवःसंतुसर्वइतिलोकेष्टिंःपृथिव्यंतरिक्षंद्यौरितिदेवताःपृथिवींमातरंमहींमंतरिक्षमु
पब्रुवे ॥ बृहंतीमूतयेदिवं ॥ विश्वंबिभर्तिपृथिव्यंतरिक्षंविर्पप्रथे ॥ दुहेद्यौर्बृहतीपर्यः ॥ वर्मंमेपृथिवीमह्यंतरिक्षंस्वस्त
ये ॥ द्यौर्मेशर्ममहिश्रवइतितिस्रस्त्रयाणांप्रथमेप्रथमस्यौत्तरेमध्यमस्यौत्तमाप्रथमाचोत्तमस्य ॥ १० ॥ मित्रविंदामहावै
राज्यंग्निःसोमोवरुणोमित्रइंद्रोबृहस्पतिंःसवितापूषासरस्वतींत्वष्टेत्येकप्रदानाः ॥ अग्निःसोमोवरुणोमित्रइंद्रोबृहस्प
तिंःसवितायःसहस्री ॥ पूषानोगोभिरवसासरस्वतींत्वष्टारूपेणसमनक्तुयज्ञं ॥ प्रतिलोममादिश्ययजैद्येऽयजामहैत्वष्टा
रंसरस्वतींपूषणंसवितारंबृहस्पतिंमिंद्रंमित्रंवरुणंसोममग्निं ॥ त्वष्टारूपाणिदधतीसरस्वतींभगंपूषासवितानोददातु ॥
बृहस्पतिर्ददिंद्रःसहस्रंमित्रोदातावरुणःसोमोअग्निरित्यष्टौवैराजतंत्रास्तासामाद्याःषळेकहविर्षःस्नुषाःश्वशुरीययाभि
चरन्यजेतैंद्रःसूरोअतरद्रजांसिस्नुषासपत्नाःश्वशुरोहमस्मि ॥ अहंशत्रून्जयामिजर्हृषाणोऽहंवाजंजयामिवाजसातौ ॥
इंद्रःसूरःप्रथमोविश्वकर्मामरुत्वाँअस्तुगणवान्सजातैः ॥ ममस्नुषाःश्वशुरस्यप्रशिष्टौसपत्नावाचंमनसउपासतां ॥
जुष्टोदमूनाअग्नेशर्धमहतेसौभगायेतिसंयाज्यैविमतानांसंमत्यर्थैसंज्ञान्यग्निर्वसुमान्सोमोरुद्रवानिंद्रोमरुत्वान्वरुणआ
दित्यवानित्येकप्रदानाः ॥ अग्निःप्रथमोवसुभिर्नोअव्यात्सोमोरुद्रैरभिरक्षतुत्मना ॥ इंद्रोमरुद्भिर्ऋतुथाकृणोत्वादित्यै
र्नोवरुणःशर्मयंसत् ॥ समग्निर्वसुभिर्नोअव्यात्संसोमोरुद्रियाभिस्तनूभिः ॥ सामिंद्रोरातहव्योमरुद्भिःसमादित्यैर्वरु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णोविश्ववेदाइत्यैंद्रामारुतींभेदकामांमरुतोयस्यहिक्षयैंप्रशर्धायमारुतायस्वभानवइत्यैंद्रीमनूच्यमारुत्यायजैन्मांरुतीम
नूच्यैंद्र्यायजैदिंद्रंपूर्वंनिगमेषुंमरुतोवेंद्रंवांप्रदानांदूर्ध्वंमरुतंःप्रकृत्यासंपत्तिकामांःसंज्ञानींचैंद्राबार्हस्पत्यांप्रधृष्यमाणां
आनइंद्राबृहस्पतींअस्मेइंद्राबृहस्पतीइतियद्यपींद्रायचोदयेयुः ॥ ११ ॥ पवित्रेष्ट्यामुपामिदंन्ययंनंसमुद्रस्यंनिवे
शंनं ॥ अन्यंतैअस्मत्तंपंतुहेतयंःपावकोअस्मभ्यैंशिवोभंव ॥ नमंस्तेहरसेशोचिषेनमंस्तेअस्त्वर्चिषे ॥ अन्यंतैअस्मत्तंपंतु
हेतयंःपावकोअस्मभ्यैंशिवोभवेतिंपावकवत्यौधाय्यैंपावकवंतावाज्यभागांवग्नीरक्षांसिसेधतियोधारयापावकयेत्यृचौ
याज्यैंयत्तेपवित्रमर्चिष्यांकलशेषुधावतीतिंपवित्रइत्येतेग्निंःपवमानःसरस्वतींप्रियाअग्निंःपावकंःसवितासत्यप्रसवोंग्निंः
शुचिर्वायुर्निंयुत्वांनग्निर्व्रतपतिर्दधिक्रावांग्निर्वैश्वानरोविष्णुंःशिपिविष्टंऽउतनंःप्रियाप्रियास्वंमाजुह्वानायुष्मदानमो
भिर्वायुरग्रेगायज्ञग्रींर्वायोशुक्रोअयामितेंदधिक्राव्णोअकारिषंमादधिक्राःशवसापंचकृष्टींर्जुष्टोदमूनांऽअग्नेशर्धमहते
सौभगायेतिसंयाज्यैंसैषासंवत्सरमतिप्रवसतंःशुद्धिकामोवांतदेषाभियज्ञगाथागीयते ॥ वैश्वानरींव्रातपतींपवित्रेष्टिंत
थैवच ॥ ऋतावृतौप्रयुंजानंःपुनातिदशपौरुषमिति ॥ १२ ॥ वर्षकामेष्टिंःकारीरींतस्यांप्रतित्यंचारुमध्वरंमीळेअग्निं
स्ववसंनमोभिरितिधाय्यैयाःकाश्चवर्षकामेष्ट्योप्सुमंतावप्स्वग्नेसधिष्टवांप्सुमेसोमोऽअब्रवीदित्यग्निर्धामच्छन्मरुतंःसूर्य
स्तिस्रश्चपिंड्यउत्तरांहिरण्यकेशोरजसोविसारइतिद्वैत्वंत्याचिदच्युतांधामंतेविश्वंभुवनमधिश्रितमितिवांवाश्रेवविद्यु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्मिमातिंपर्वतश्चिन्महिवृद्धोबिभायसृजंतिरश्मिमोजसावहिष्ठेभिर्विहरन्यासितंतुमुदीरयथामरुतःसमुद्रतःप्रवोमरुत
स्तविषाउदन्यवंआयंनरःसुदानवोददाशुषेविद्युन्महसोनरोअश्मदिद्यवंःकृष्णंनियानंहरयःसुपर्णीनियुत्वंतोग्रामजितो
यथानरोंऽग्नेबाधस्वविमृधोविदुर्गहायंत्वादेवापिःशुशुचानोअग्नइतिसंयाज्यैंऋचोनूच्ययजुर्भिरेकेयजांतिसंस्थितायांस
र्वादिशउपतिष्ठेतांच्छावदतवसंगीर्भिराभिरितिचतसृभिःप्रत्यृचंसूक्तेनसूक्तेनवा ॥ १३ ॥ अतऊर्ध्वमिष्ट्ययनानिसांव
त्सरिकाणिंतेषांफाल्गुन्यांपौर्णमास्यांचैत्र्यांवाप्रयोगंस्तुरायणमग्निरिंद्रोविश्वेदेवाइतिंपृथगिष्टयोऽनुसवनंमहरहरेका
वांत्रिहविर्दाक्षायणयज्ञेद्वेपौर्णमास्यौद्वेअमावास्येयजेतनित्येपूर्वेयथासंनयतोंमावास्यायामुत्तरयोरैंद्रंपौर्णमास्यांद्विती
यंमैत्रावरुणंममावास्यायामानोमित्रावरुणायद्वंहिष्ठंनातिविधेसुदानूइतिंप्राजापत्यइळादधंःप्रजापतेनत्वदेतान्यन्य
स्तवेमेलोकाःप्रदिशोदिशंश्चपरावतोंनिवर्तउद्वर्तश्च ॥ प्रजापतेविश्वसृज्जीवधन्यइदंनोदेवप्रतिहर्यहव्यमितिद्यावापृथि
व्योरयनंपौर्णमासेनामावास्यादामावास्येनापौर्णमासादसमाम्नातास्वर्थात्तंत्रविकारोध्वर्युर्वायथास्मरेद्वैराजंत्वग्निमं
थनेधाय्येत्वेवैकेदेवतलक्षणायाज्यानुवाक्यागायत्र्यावतीहूतवत्युपोत्तवतींपुरस्ताल्लक्षणानुवाक्यांत्रिष्टुब्वतीवीतवतीं
जुष्टवत्युपरिष्टाल्लक्षणायाज्यांपिवान्यस्यछंदसोनतुयाज्याह्वसीयसींनोष्णिङ्नबृहतींक्षामनष्टहतदग्धवतीस्तुवर्जयेद्य
क्तेतुदैवतेतथैवलक्षणमपिवाव्यक्तेनधिगच्छंन्सर्वशोनधिगमंआग्नेयीभ्यांव्याहृतिभिर्वादेवतामादिश्यप्रणुयाद्यजेच्चन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्राभ्यांवेममाशृणुधीहवंयंत्वागीर्भिर्हवामहे ॥ एदंबर्हिर्निषीदनः ॥ स्तीर्णंबर्हिरानुषगासदेतदुपेळानाइहनोअद्यगच्छ ॥ अहेळतामनसेदंजुषस्वंवीहिहव्यंप्रयतमाहुतंमइतिनमेंआग्नेय्यावनिरुक्ते ॥ १४ ॥ चातुर्मास्यानिप्रयोक्ष्यमाणःपूर्वेद्युर्वैश्वानरपार्जन्यांवैश्वानरोअजीजनदग्निर्नोनव्यसींमतिं ॥ क्षमयावृधानओजसा ॥ पृष्टोदिविपृष्टोअग्निःपृथिव्यांपर्जन्यायप्रगायतंप्रवातावांतिपतयंतिविद्युतइत्यग्न्याधेयप्रभृत्यातउपाँशुहविषःसौमिक्यःप्रायश्चित्तिक्योन्वायात्यैककपालाःसर्वत्रवारुणवर्जंसावित्रश्चातुर्मास्येषुप्रधानहवींषिचैकैपित्र्योपसदःसतंत्राःपौनराधेयिकीचप्रागुत्तमादनुयाजादपिवासुमंद्रतंत्राआगूःप्रणववषट्काराउच्चैःसर्वत्रतथाप्रयणेग्रियमाहार्यस्तुप्राणसंततःप्रणवःपुरोनुवाक्यायास्तथागूर्वषट्कारौयाज्यायास्तंत्रस्वराण्युपांशोरुच्चानिमंद्राण्युपांशुतंत्राणां ॥ १५ ॥ प्रातर्वैश्वदेव्यांप्रेषितोऽग्निमंथनीयाअन्वाहपश्चात्सामिधेनीस्थानस्यपदमात्रेवस्थायाभिहिंकृत्याभित्वादेवसवितर्महीद्यौःपृथिवीचनस्त्वामग्नेपुष्करादधीतितिसृणामर्धर्चंशिष्ट्वारमेदासंप्रैषादन्यत्राप्यंतर्ऋचोवसानेजायमानेत्वेतस्मिन्नेवावसानेग्नेहंसिन्यत्रिणमितिसूक्तमावपेतंपुनःपुनराजन्मनोजातंश्रुत्वानंतरेणप्रणवेनशिष्टमुपसंतनुयाच्छिष्टेनोत्तरांमुतब्रुवंतुजंतवंआयंहस्तेनखादिनमित्यर्धर्चंआरमेत्प्रदेवंदेववीतयइतिद्वेअग्निनाग्निःसमिध्यतेत्वंह्यग्नेअग्निनातंमर्जयंतसुक्रतुंयज्ञेनयज्ञमयजंतदेवाइतिपरिदध्यात्सर्वत्रोत्तमांपरिधानीयेतिविद्याद्धाय्येविराजौनवप्रयाजाःप्रागुत्तमाच्चतुरआवपेतंदुरोअग्नआज्यस्यव्यंतूषासानक्तान्नआ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्यस्यवीतांदैव्याहोतारान्नआज्यस्यवीतांतिस्रोदेवीरन्नआज्यस्यव्यंत्वित्यग्निःसोमःसवितासरस्वतीपूषामरुतःस्वतव
सोविश्वेदेवाद्यावापृथिवीआविश्वदेवंसत्पतिंवाममद्यसवितर्वाममुश्वःपूषंतवव्रतेवयंशुक्रंतेअन्यद्यजतंतेअन्यदिहेहवः
स्वतवसःप्रचित्रमर्कंगृणतेतुरायेतिनवानुयाजाःषळूर्ध्वंप्रथमादेवीर्द्वारोवसुवनेवसुधेयस्यव्यंतु । देवीउषासानक्तावसु
वनेवसुधेयस्यवीतां । देवीजोष्ट्रीवसुवनेवसुधेयस्यवीतां । देवीऊर्जाहुतीवसुवनेवसुधेयस्यवीतां । देवादैव्याहोतारव
सुवनेवसुधेयस्यवीतां । देवीस्तिस्रस्तिस्रोदेवीर्वसुवनेवसुधेयस्यव्यंत्वित्यनुयाजानांसूक्तवाकस्यशंयुवाकस्यवोपरिष्टाद्वा
जिभ्योवाजिनमनावाह्यादेशैशंनोभवंतुवाजिनोहवेषुवाजेवाजेवतवाजिनोनइत्यूर्ध्वज्ञुरनवानंयाज्यांग्नेवीहीत्यनुवषट्
कारोवाजिनस्याग्नेवीहीतिवायत्रक्वचैकसंप्रैषेद्वौवषट्कारौसमस्तावेवंतत्रद्विरनुमंत्रयेतनचागूरुत्तरस्मिन्वाजिनभक्षमि
ळामिवप्रतिगृह्योपहवमिच्छेताध्वर्यउपह्वयस्वब्रह्मन्नुपह्वयस्वाऽग्नीदुपह्वयस्वेतियन्मेरेतःप्रसिच्यतेयद्वामेअपिगच्छति
यद्वाजायतेपुनः । तेनमाशिवमाविशतेनमावाजिनंकुरु ॥ तस्यतेवाजिपीतस्योपहूतस्योपहूतोभक्षयामीतिप्राणभक्षंभ
क्षयेदेवमध्वर्युर्ब्रह्माग्नीध्रोयजमानःप्रत्यक्षमितरेचदीक्षिताः । पौर्णमासेनेष्ट्वाचातुर्मास्यव्रतान्युपेयात्केशान्निवर्तयीतश्म
श्रूणिवापयीताधःशयीतमधुमांसलवणस्त्रियवलेखनानिवर्जयेदृतौभार्यामुपेयाद्वापनंसर्वेषुपर्वस्वाद्योत्तमयोर्वा ॥ १६ ॥
पंचम्यांपौर्णमास्यांवरुणप्रघासैःपश्चाद्दार्शपौर्णमासिकायावेदेरुपविश्यप्रेषितोग्निप्रणयनीयाःप्रतिपद्यतेप्रदेवंदेव्याधिये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तितिस्नइळायास्त्वापदेवयमग्नेविश्वेभिःस्वनीकदेवैरित्यर्धर्चआरभेदासीनःप्रथमामन्वाहोपांशुसप्रणवांतत्रस्थानात्स्था
नसंक्रमणेप्रणवेनावसायानुच्छ्वस्योत्तरांप्रतिपद्यतेप्राणसंततंभवतीतिविज्ञायतउत्तरमग्निमनुव्रजन्नुत्तराइमंमहेविदथ्या
यशूषमयमिहप्रथमोधायिधातृभिरितितुराजन्यवैश्ययोराद्यैपश्चादुत्तरस्यावेदेरवस्थायोत्तरवेदेस्तुसोमेषुनिहितेग्नौसी
दहोतःस्वउलोकेचिकित्वान्निहोताहोतृषदनेविदानइतिद्वेपरिधायतस्मिन्नेवासनउपविश्यभूर्भुवःस्वरितिवाचंविसृजे
तान्यत्रापियत्रानुब्रुवन्ननुव्रजेत्तिष्ठत्संप्रैषेषुतथैववाग्विसर्गोऽग्निमंथनादिसमानावैश्वदेव्यांहविषांतुस्थानेषष्ठप्रभृतीना
मिंद्राग्नीमरुतोवरुणःकः ॥ इंद्राग्नीअवसागतंश्नथद्वृत्रमुतसंनोतिवाजंमरुतोयस्यहिक्षयेराइवेदचरमाअहेवेमंमेवरुणश्रु
धितत्त्वायामिब्रह्मणावंदमानःकयानश्चित्रआभुवद्भिरण्यगर्भःसमवर्ततात्रइतिप्रतिप्रस्थातावाजिनेतृतीयंःसंस्थिता
यामवभृथंव्रजंतितत्रावभृथेष्टिःकृताकृतातामुपरिष्टाद्व्याख्यास्यामोद्वयोर्मासयोरैंद्राग्नःपशुः ॥ १७ ॥ तथाततःसाकमे
धाःपूर्वेद्युस्तिस्नइष्टयोनुसवनंप्रथमायामग्निरनीकवाननीकवंतमूतयेग्निंगीर्भिर्हवामहे । सनःपर्षदतिद्विषः । सैनानीकेन
सुविदत्रोअस्मेइत्युत्तरस्यांवृधन्वंतौमरुतःसांतपनाःसांतपनाइदंहविर्योनोमरुतोअभिदुर्हृणायुरितिमरुद्भ्योगृहमेधेभ्यं
उत्तराज्यभागप्रभृतीळांतागृहमेधासआगतंप्रबुध्यावईरतेमहांसीतिपुष्टिमंतौविराजौसंयाज्यैअनिगदेअन्यत्राप्यना
वाहनंआवहनेपिपित्र्यायांपशौचबहुचैतस्यांरात्र्यामन्नंप्रसुवीरंस्तस्याविवासेपौर्णदर्वजुहुयुर्ऋषभेरवाणेस्तनयित्नौवाग्नी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्रंहैकेरावयंतिब्रह्मपुत्रंवदंतोयदिहोतारंचोदयेयुस्तस्ययाज्यानुवाक्यै । पूर्णादर्विपरापतसुपूर्णापुनरापत ॥ वस्नेवविक्रीणावहाइषमूर्जंशतक्रतो ॥ देहिमेददामितेनिमेधेहिनितेदधे ॥ अपामिक्यमिवसंभरकौबाददतेदददितिंमरुद्भ्यःक्रीळिभ्यउत्तरौतब्रुवंतुजंतवोयंकृद्धरगृभीतइतिंपरोक्षवार्त्रघ्नौक्रीळंवःशर्धोमारुतंमत्यासोनयेमरुतःस्वंचौजुष्टोदमूनाअग्नेशर्धमहतेसौभगायेतिसंयाज्यैवाजिनावभृथवर्जंमाहेंद्युक्तावरुणप्रघासैर्हविषांतुसप्तमादीनांस्थानंइंद्रोवृत्रहेंद्रोमहेंद्रोवाविश्वकर्मातूनइंद्रवृत्रहंन्ननुतेदायिमहइंद्रियायविश्वकर्मन्हविषावावृधानोयातेधामानिपरमाणियावमेति ॥ १८ ॥ दक्षिणाग्नेरग्निमतिप्रणीयपित्र्यासाशय्वंतालुप्तजपाहोतारमवृथावषट्कारानुमंत्रणाभिहिंकारवर्जंतस्यांप्राचिकर्माणिंदक्षिणेतराणितथान्वयमुशंतस्त्वानिधीमहीत्येतांत्रिरनवानंताःसामिधेन्यस्तासामुत्तमेनप्रणवेनावहदेवान्पितॄन्यजमानायेतिप्रतिपत्तिरग्निंहोत्रायावहस्वंमहिमानमावहेत्येतस्यस्थानेनाग्निंकव्यवाहनमावाहयेदुत्तमेचैनंप्रयाजेप्रागाज्यपेभ्योनिगमयेत्सूक्तवाकेचाग्निर्होत्रेणेत्येतस्यस्थानेनेहप्रादेशोनबर्हिष्मंतौप्रयाजानुयाजौनेळायांभक्षभक्षणेनमार्जनंनसूक्तवाकेनामादेशईक्षितःसीदहोतरितिवोक्तउपविशेज्जीवातुमंतौसव्योत्तर्युपस्थाःप्राचीनावीतिनोहविर्भिश्चरंतिदक्षिणआग्नीध्रउत्तरोध्वर्युर्द्वेद्वेअनुवाक्यैअध्यर्धामनवानंमोंस्वधेत्याश्रावणमस्तुस्वधेतिप्रत्याश्रावणमनुस्वधास्वधेतिसंप्रैषोयेस्वधेत्यागूर्यैस्वधामहइतिवास्वधानमइतिवषट्कारोनित्याःश्रुतयःपितरःसोमवंतःसोमोवापितृमान्पितरोबर्हिषदःपितरो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्निष्वात्तायमउदीरतामवरउत्परास्त्वयाहिनःपितरःसोमपूर्वेउपहूताःपितरःसोम्यासस्त्वंसोमप्रचिकितोमनीषासो
मोधेनुंसोमोअर्वतमाशुंत्वंसोमपितृभिःसंविदानोबर्हिषदःपितरऊत्यर्वागाहंपितृन्त्सुविदत्राँअवित्सींदंपितृभ्योनमोअ
स्त्वद्याग्निष्वात्ताःपितरएहगच्छतयेचेहपितरोयेचनेहयेअग्निदग्धायेअनग्निदग्धाइमंयमप्रस्तरमाहिसीदेतिद्वेपरेयिवां
संप्रवतोमहीरनुवैवस्वतायचेन्मध्यमायाज्यायेतातृषुर्देवत्राजेहमानास्त्वदग्नेकाव्यात्वन्मनीषाःसप्रत्नथासहसाजाय
मानइत्यग्निःस्विष्टकृत्कव्यवाहनःप्रकृत्यातऊर्ध्वंवषट्कारक्रियायांचोर्ध्वमाज्यभागाभ्यामन्यन्मंत्रलोपादेकैकाचानु
वाक्यायोअग्निःकव्यवाहनस्त्वमग्नईळितोजातवेदइतिसंयाज्येभक्षेषुप्राणभक्षान्भक्षयित्वाबर्हिष्यनुप्रहरेयुःसंस्थिता
याँप्राग्वानुयाजाभ्यांदक्षिणावृतोदक्षिणाग्निमुपतिष्ठतेनावृत्यानतिप्रणीतचर्यायामयाविष्ठाजनयत्कर्वराणिसहिघृणिरु
रुर्वरायगातुः। सप्रत्युदैद्धरुणंमध्वोअग्रंस्वांयत्तनूंतन्वामैरयतेत्यावृत्यत्वेवेतरावाहवनीयंसुसंदृशंत्वेतिपंक्त्यागार्हपत्य
मग्निंतंमन्यइत्यथैनमभिसमायंतिमाप्रगामाग्नेत्वंनइतिजपंतःपूर्वेणगार्हपत्यंसूक्तेसमाप्यसव्यावृतस्त्र्यंबकान्व्रजंतितत्रा
ध्वर्यवःकर्माधीयतेप्रत्येत्यादित्ययाचरंतिपुष्टिमंतौधाय्येविराजौ ॥ १९ ॥ पंचम्यांपौर्णमास्याँशुनासीरीययावाग्य
थोपपत्तिवावाजिनवर्जंसमानावैश्वदेव्याहविषांतुस्थानेषष्ठप्रभृतीनांवायुर्नियुत्वान्वायुर्वाशुनासीरावित्विंद्रोवाशुनासीर
इंद्रोवाशुनःसूर्यउत्तमआवायोभूषशुचिपाउपनःप्रयाभिर्यासिदाश्वांसमच्छसत्वंनोदेवमनसेशानायप्रहुतिंयस्तआनट्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुनासीराविमांवाचंजुषेथांशुनंनःफालाविकृषंतुभूमिमिंद्रंवयंशुनासीरमस्मिन्युज्ञेहवामहे ॥ सवाजेषुप्रनोंविषत् ॥
अश्वायंतोंगव्यंतोंवाजयंतःशुनंहुवेममघवानमिंद्रमश्वायंतोंगव्यंतोंवाजयंतस्तरणिंर्विश्वदर्शतश्चित्रंदेवानामुदगाद
नीकंमितियाज्यानुवाक्याःसमाप्यंसोमेनयजेताशक्तौपशुनाचातुर्मास्यानिवापुनश्चातुर्मास्यानिवापुनः ॥ २० ॥ ॥
इत्याश्वलायनश्रौतसूत्रेपूर्वषट्केद्वितीयोऽध्यायः ॥ २ ॥ ॥ ॥

हरिःॐ३म् ॥ पशाविष्टिरुभयतोन्यतरतोवाग्नेयीवाग्नावैष्णवीवोभेवान्यत्तरापुरस्तादुक्तमग्निप्रणयनंपश्चात्पाशुबं
धिकायावेदेरुपविश्यप्रेषितोयूपायाज्यमानायांजंतित्वामध्वरेदेवयंतइत्युत्तमेनवचनेनार्धर्चआरमेदुच्छ्रयस्ववनस्पतें
समिद्धस्यश्रयमाणःपुरस्तादूर्ध्वऊषुणऊतयइतिद्वैजातोजायतेसुदिनत्वेअह्नामित्यर्धर्चआरमेद्युवासुवासाःपरिवीतआ
गादितिपरिदध्याद्यत्रैकतंत्रेबहवःसपशवोंत्यंपरिधायसंस्तुयादनभिहिंकृत्यायान्वोनरोदेवयंतोनिमिम्युरितिषड्भिःपंच
भिर्वानभ्यासमेकंउक्तमग्निमंथनंतथाधाय्यैकृताकृतावाज्यभागावावाहनेपशुदेवताभ्योवनस्पतिमनंतरंसमार्गैःसंमृ
ज्यप्रवृताहुतीर्जुहुयाज्जुष्टोवाचेभूयासंजुष्टोवाचस्पतयेदेविवाक् ॥ यद्वाचोमधुमत्तमंतस्मिन्माधाःसरस्वत्यैवाचेस्वा
हा ॥ पुनरादायपंचविग्राहंस्वाहावाचेस्वाहावाचस्पतयेस्वाहासरस्वत्यैस्वाहासरस्वतेमहोभ्यःसंमहोभ्यःस्वाहेतिसो
मएवैकेप्रशास्तारंतीर्थेनप्रपाद्यदंडमस्मैप्रयच्छेद्दक्षिणोत्तराभ्यांपाणिभ्यांमित्रावरुणयोस्त्वाबाहुभ्यांप्रशास्त्रोःप्रशिषाप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यच्छामीतितथायुक्ताभ्यामेवेतरौमित्रावरुणयोस्त्वाबाहुभ्याँप्रशास्त्रोःप्रशिषाप्रतिगृह्णाम्यवक्रोविथुरोभूयासमितिप्र
तिगृह्योत्तरेणहोतारमतिव्रजेद्दक्षिणेनदंडंहरेन्नचानेनसंस्पृशेदात्मानंवान्यंवाप्रैषवचनादन्यान्यपियज्ञांगान्युपयुक्ता
निनविहारेणव्यवेयाद्दक्षिणोहोतृषदनात्प्रह्वोवस्थायवेद्यांदंडमवष्टभ्यब्रूयात्प्रैषांश्चादेशमनुवाक्यांचसप्रैषेपूर्वांप्रैषात्पर्य
ग्निस्तोकमनोतोन्नीयमानसूक्तानिचसोमआसीनोन्यत् ॥१॥ एकादशप्रयाजास्तेषांप्रैषाःप्रथमंप्रैषसूक्तमुक्तँद्वितीयेध्वर्यु
प्रेषितोमैत्रावरुणःप्रेष्यतिप्रैषैर्होतारँहोतायजत्याप्रीभिःप्रैषसलिंगाभिःसमिद्धोअग्निरितिशुनकानाँजुषस्वनःसमिधमि
तिवसिष्ठानाँसमिद्धोअद्येतिसर्वेषाँयथऋषिवाप्राजापत्येतुजामदग्न्यःसर्वेषांदशसूक्तेषुप्रेषितोमैत्रावरुणोग्निर्होतानइ
तितृचंपर्यग्नयेन्वाहाग्निगवेप्रेष्योपप्रेष्यहोतरितिवोक्तौजैदग्निरसनद्वाजमितिप्रैषमुक्त्वांतर्वेदिदंडंनिदध्यादग्निगुंहोतो
हंनंगानिदैवतँपशुमितियथार्थंपुंवन्मिथुनेमेधपतीमेधायांविकल्पोयथार्थमूर्ध्वमग्निगोरन्यन्मिथुनेभ्यःसर्वेषुयजुर्निग
देषुप्रकृतौसमर्थनिगमेषुप्राकृतास्त्वेवमंत्राणाँशब्दाःप्रतिनिधिष्वपिनाभिरुपमामेदोहविरित्यनूह्यानि ॥ २ ॥ दैव्याः
शमितारआरभध्वंमुतमनुष्याउपनयतमेध्यादुरंआशासानामेधपतिभ्यांमेधम् ॥ प्रास्माअग्निंभरतस्तृणीतबर्हिरन्वेनं
मातामन्यतामनुपितानुभ्रातासगर्भ्योनुसखासयूथ्यः ॥ उदीचीनांअस्यपदोनिधत्तात्सूर्यचक्षुर्गमयताद्वातंप्राणमन्व
वसृजतादंतरिक्षमसुंदिशःश्रोत्रंपृथिवींशरीरं ॥ एकधास्यत्वचमाच्छयतात्पुरानाभ्याअपिशसोवपामुत्खिदतादंतरेवो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्माणंवारयध्वात् ॥ श्येनमस्यवक्षःकृणतात्प्रशसाबाहूशलादोषणीकश्यपेवांसाच्छिद्रेश्रोणीकवषोरूस्रेकपर्णाष्ठीवंता षड्विंशतिरस्यवंक्र्यस्ताअनुष्ठ्योच्यावयतादृात्रंगात्रमस्यानूनंकृणुतात् ॥ ऊवध्यगोहंपार्थिवंखनतात् ॥ अस्त्रारक्षः संसृजतात् ॥ वनिष्ठुमस्यमाराविष्टोरूकंमन्यमानानेद्वस्तोकेतनयैरवितारवच्छमितारः ॥ अध्रिगोशमीध्वंसुशमिशमी ध्वैंशमीध्वमध्रिगा३उअपापास्त्रारक्षःसंसृजताच्छमितारोपापेत्युपाँश्वेकधाषड्विंशतिरितिद्विर्द्विबहूनांपुरांतरितिचैकै ध्रिग्वादितित्रिरुक्त्वाशमितारोयदत्रसुकृतंकृणवथास्मासुतद्यदुष्कृतंमन्यत्रतदितिजपित्वादक्षिणावृदावर्ततेमैत्रावरु णश्चसव्यावृतौब्रह्मयजमानौसंज्ञप्तेपशावावर्तेरन् ॥ ३ ॥ वपायांश्रप्यमाणायांप्रेषितस्तोकेभ्योन्वाहजुषस्वसप्रथस्तम मिमंनोयज्ञमित्युक्तमादापनैस्वाहाकृतिभ्योहोतायक्षदग्निंस्वाहाज्यस्यस्वाहामेदसइतिप्रैषउत्तमाप्रीयाज्यावपापुरोळा शोहविरितिपशोःप्रदानानितानिपृथङ्नानादेवतेषुमनोतांचनमनोतावर्तेतेत्येकैतेषांसलिंगाःप्रैषास्तेष्वग्नीषोमयोःस्थानै यायापशुदेवताछागस्थानउस्रोगौर्मेषोविकोहयोश्वोन्वादेशेव्यक्तचोदनामेवंवनस्पतिःस्विष्टकृत्सूक्तवाकप्रैषेषुप्राजाप त्येत्वग्निचित्यासंयुक्तैवायव्यंपशुपुरोळाशमेकैवायव्येप्राजापत्यैतेनपशुदेवतावर्धतइत्याचार्याःपुरोळाशतत्प्रधानत्वा त्पुरोळाशनिगमेषुपुरोळाशवद्धवींष्याज्यवर्जंयेषांतेनसमवत्तहोमोमेधोरभीयानितिपश्वभिधानेआदद्धसकर्रज्रुषताम घदग्रभींदवीवृधतेतिदेवतानां ॥४॥ हुतायांवपायांसब्रह्मकाश्चात्वालेमार्जयंतेनिधायदंडंमैत्रावरुणइदमापःप्रवहतसु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मित्र्यानआपओषधयःसंतुदुर्मित्र्यास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मइत्येतावन्मार्जनंपशौतीर्थेननिष्क्रम्याऽसीता
मापुरोळाशश्रपणात्तेनचरित्वास्विष्टकृदाचरेयुर्यदित्वन्वायात्यानैतैरग्रेचरेयुर्नतुतेषांनिगमेष्वनुवृत्तिर्नान्येषामूर्ध्वमा
वाहनादुत्पन्नानामिळामग्नेपुरुदंससनिंगोर्होतायक्षदग्निंपुरोळाशस्यस्वदस्वहव्यासमिषोदिदीहीतिपुरोळाशस्विष्टकृत
ऊर्ध्वमिळायाः ॥५॥ मनोतायैसंप्रेषितस्त्वंह्यग्नेप्रथमइत्यन्वाहहविषाचरंतितत्रप्रैषेकरतएवाग्नीषोमावेवमित्यैतरेयिणो
न्यत्रद्विदेवतान्मैत्रावरुणदेवतेचतथाहदृष्टत्वात्प्रकृत्यागाणगारिरुत्पन्नानांस्मृतआम्नायेनर्थभेदेनिरर्थोविकारोयाज्या
याअंतरार्धचौवसाहोमआरमेद्बनस्पतिनाचरंतिप्रैषमभितोयाज्यानुवाक्यैयत्राग्नेराज्यस्यहविषइत्यत्राज्यभागावयाळ
ग्निरग्नेराज्यस्यहविषइतिस्विष्टकृतीळामुपह्वयानुयाजैश्चरंतितेषांप्रैषास्तृतीयंप्रैषसूक्तमेकादशेहप्रागुक्तमाद्धावावपेतदे
वोवनस्पतिर्वसुवनेवसुधेयस्यवेतु ॥ देवंबर्हिर्वारितीनौवसुवनेवसुधेयस्यवेत्वित्यनवानंप्रेष्यत्यनवानंयजत्युक्तमुत्तमे
सूक्तवाकप्रैषेपूर्वस्मिन्निगमेगृह्णन्नित्यत्राज्यभागौबध्नन्नमुष्माअमुंबध्नन्नमुष्माअमुमितिपशूंश्चदेवताश्चदेवताश्चैवैकपशु
कांःपशूंश्चैवैकदेवतानुत्तरआज्येनेत्याज्यभागावमुष्माअमुनेतिपूर्वेणोक्तंसमाप्यप्रैषमग्नौदंडमनुप्रहरेदनवभृथेवभृथे
न्यत्रकृताकृतंवेदस्तरणंतीर्थेननिष्क्रम्याग्निपशुकेतनान्यव्यवयंतोहृदयशूलमुपोयमानमनुमंत्रयेरन्छुगसियोस्मान्द्वेष्टि
यंचवयंद्विष्मस्तमभिशोचेतितस्योपरिष्टादपउपस्पृशंतिद्वीपेराज्ञोवरुणस्यगृहोमितोहिरण्ययः ॥ सनौधृतव्रतोराजाधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्रोधान्नइहमुँचतु ॥ धान्नोधान्नोराजन्नितोवरुणनोमुंच ॥ यदापोअइयाइतिवरुणेतिशपांमहेततोवरुणनोमुंच ॥ मयि वापोमोषधीर्हिंसीरतोविश्वव्यंचाभूस्त्वेतोवरुणनोमुंच ॥ सुमित्र्यानआपओषधयःसंत्विति चास्पृष्ट्वानवेक्षमाणाअसंस्पृशंतःप्रत्यायंतःसमिधःकुर्वतेतिस्रस्तिस्रएकैकोग्नेःसमिदसितेजोसितेजोमेदेहीतिप्रथमांमेधोस्येधिषीमहीतिद्वितीयांसमिदसिसमेधिषीमहीतितृतीयांमेत्योपतिष्ठंतआपोअद्यान्वचारिषमितितःसमिधोभ्यादधातियथागृहीतमग्नेःसमिदसितेजोसितेजोमेदाःस्वाहा॥सोमस्यसमिदसिदुरिष्टेर्मापाहिस्वाहा॥पितॄणांसमिदसिमृत्योर्मापाहिस्वाहेतितःसंस्थाजपइतिपशुतंत्रं॥६॥ प्रदानानामुक्ताःप्रैषास्तेषांयाज्यानुवाक्याःसर्वेषामग्रेग्रेनुवाक्यास्तोयाज्यादैवतेनपशुनानात्वमग्नेनयसुपथारायेअस्मानितिद्वैपाहिनोअग्नेपायुभिरजस्रैःप्रवःशुक्रायभानवेभरध्वंयथाविप्रस्यमनुषोहविर्भिःप्रकारवोमनावच्यमानाएकाचेतत्सरस्वतीनदीनामुतस्यानःसरस्वतीजुषाणासरस्वत्यभिनोनेषिवस्यःप्रक्षोदसाधायसासस्रएषापावीरवीकन्याचित्रायुर्यस्तेस्तनःशशयोयोमयोभूस्त्वंसोमप्रचिकितोमनीषेतिद्वैत्वंनःसोमविश्वतोवयोधायातेधामानिदिवियापृथिव्यांमषाद्धंयुत्सुपृतनासुपप्रिंयातेधामानिहविषायजंतियास्तेपूषन्नावोअंतःसमुद्रइतिद्वैपूषेमाआशाअनुवेदसर्वाःशुक्रंतेअन्यद्यजतंतेअन्यत्प्रपथेपथामजनिष्टपूषापथस्पथःपरिपातिंवचस्यांबृहस्पतेयापरमापरावदितिद्वैबृहस्पतेअतियदर्योअर्हीत्तमृत्वियाउपवाचःसचंतेसंयंस्तुभोवनयोनयंत्येवापित्रेविश्वदेवायवृष्णेविश्वेअद्यमरुतोविश्वंऊ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यानोदेवानामुपवेतुशंसंआनोविश्वआस्क्रागमंतुदेवाविश्वेदेवाःशृणुतेमंहवंमेयेकेचज्मामहिनोअहिमायाअग्नेयाहिदू
त्यंमारिषण्यइंद्रंनरोनेमधिताहवंतइतितिस्रउरुनोलोकमनुनेषिविद्वान्प्रससाहिषेपुरुहूतशत्रूंन्त्स्वस्तयेवाजिभिश्चप्रणे
तःशुचीवोहव्यामरुतःशुचीनांनूष्टिरंमरुतोवीरवंतमावोहोताजोहवीतिसत्तःप्रचित्रमर्कंगृणतेतुरायाराइवेदचरमाअ
हेवंयावःशर्मशशमानायसंत्यावृत्रहणावृत्रहभिःशुष्मैराभरतंशिक्षतंवज्रबाहुंउभावामिंदाग्नीआहुवध्यैशुचिंनुस्तोमंनव
जातमद्यगीर्भिर्विप्रःप्रमतिमिच्छमानःप्रचर्षणिभ्यःपृतनाहवेष्वादेवोयातुसवितासुरत्नःसघानोदेवःसवितासहावेतिद्वे
उदीरयकवितमंकवीनांभगंधियंवाजयंतःपुरंधिमितिद्वेअवसिंधुंवरुणोद्यौरिवस्थादयंसुतुभ्यंवरुणस्वधावएवावंदस्व
वरुणंबृहंतंतत्त्वायामिब्रह्मणावंदमानइतिद्वेअस्तभ्नाद्द्यामसुरोविश्ववेदाइत्यैकादशिनाः ॥ ७ ॥ अग्नीषोमाविमंसुमेयु
वमेतानिदिविरोचनानीतितृचावावांमित्रावरुणाहव्यजुष्टिमायातंमित्रावरुणासुशस्त्यानोमित्रावरुणाहव्यजुष्टियुवंव
स्त्राणिपीवसावसाथेप्रबाहवासिसृतंजीवसेनोयद्वंहिष्ठंनातिविधेसुदानूहिरण्यगर्भःसमवर्तताग्रइतिषट्प्राजापत्याश्चित्रं
देवानामुदगादनीकमितिपंचशंनोभवचक्षसाशंनोअह्नावायोभूषशुचिपाउपनःप्रयाभिर्यासिदाश्वांसमच्छानोनियुद्भिः
शतिनीभिरध्वरंपीवोअन्नाँरयिवृधःसुमेधारायेनुयंजज्ञतूरोदसीमेप्रवायुमच्छाबृहतीमनीषातववायवृतस्पतेत्वांहिसुप्स
रस्तममितिद्वेकुविदंगनमसायेवृधासईशानायप्रहुतियस्तआनट्प्रवोवायुंरथयुजंकृणुध्वंमुतत्वामदितेमह्यनेहोनउरुव्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जेदितिर्ह्यजनिष्टसुत्रामाणंपृथिवींद्यामनेहसंमहीमूषुमातरंसुव्रतानांमदितिर्द्यौरदितिरंतरिक्षंनतेविष्णोजायमानोनजा
तंस्त्वंविष्णोसुमतिंविश्वजन्यांविचक्रमेपृथिवीमेषएतांत्रिर्देवःपृथिवीमेषएतांपरोमात्रयातन्वावृधानेरावतीधेनुमतीहि
भूतंविश्वकर्मन्हविषावावृधानइतिद्वेविश्वकर्माविमनाआद्विहायाःकिंस्विदासीदधिष्ठानंयोनःपिताजनितायोविधाता
यातेधामानिपरमाणियावमायइमेद्यावापृथिवीजनित्रींतन्नस्तुरीपमधपोषयित्नुंदेवस्त्वष्टासवितविश्वरूपोंदेवत्वष्टर्यद्ध
चारुत्वमानट्पिशंगरूपःसुभरोवयोधाःप्रथमभाजंयशसंवयोधांसोमापूषणाजननारयीणामितिसूक्तमादित्यानामव
सानूतनेनेमागिरआदित्येभ्योघृतस्नूंस्तआदित्यासउरवोगभीराइमंस्तोमंसक्रतवोमेअद्यतिस्रोभूमीर्धारयंताँरुतद्यून्नद
क्षिणाविचिकितेनसव्यांमहीद्यावापृथिवीइहज्येष्ठैऋतंदिवेतदवोचंपृथिव्याइतिद्वेप्रद्यावायज्ञैःपृथिवीनमोभिरितिद्वेप्र
द्यावायज्ञैःपृथिवीऋतावृधांमृळानोरुद्रोतनोमयस्कृधीतिद्वेआतेपितर्मरुतांसुम्नमेतुंप्रबभ्रवेवृषभायश्वितीचइतितिस्र
आपश्चातान्नासत्यापुरस्तादागोमतानासत्यारथेनेतिचतस्रोहिरण्यत्वङ्मधुवर्णोघृतस्नुरभिक्रत्वेंद्रभूरधर्मंस्त्वंमहाँइंद्रतु
भ्यंहक्षाःसत्राहणंदाधृषिंतुम्रमिंद्रंसहदानुंपुरुहूतक्षियंतंस्तुतइंद्रोमघवायद्धवृत्रैवावस्वइंद्रःसत्यःसम्राड्यद्वाग्वदंत्यवि
चेतनानिंपतंगोवाचंमनसाबिभर्तिचत्वारिवाक्परिमितापदानिंयज्ञेनवाचःपदवीयमायन्नितिद्वेदेवींवाचमजनयंतदे
वाजनीयंतोन्वग्रवइतितिस्रोदिव्यंसुपर्णंवायसंबृहंतंसवावृधेनर्योयोषणासुंयस्यव्रतंपशवोयंतिसर्वेयस्यव्रतमुपतिष्ठंत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आपः ॥ यस्यव्रतेपुष्टिपतिर्निविष्टस्तंसरस्वंतमवसेहुवेमेतिपशवःसौम्याश्चनिर्मिताश्चनिर्मितऐंद्राग्नःषाण्मास्यःसांवत्सरो
वाप्राजापत्यउपांशुसावित्रसौर्यवैष्णववैश्वकर्मणाश्चैतेषांतत्रोपांशुयाजविकारान्वक्ष्यामःप्रैषादिरागुरस्थानआदद्धस
त्करदितिचैतानियथास्थानमुपांशु ॥८॥ सौत्रामण्यामाश्विनसारस्वतैंद्राःपशवोबार्हस्पत्योवाचतुर्थीऐंद्रसावित्रवारुणा
पशुपुरोळाशामार्जयित्वायुवंसुराममश्विनेतिग्रहाणांपुरोनुवाक्याहोतायक्षदश्विनासरस्वतीमिंद्रंसुत्रामाणंसोमानांसु
राम्णांजुषंतांव्यंतुपिबंतुमदंतुसोमान्त्सुराम्णोहोतर्यजेतिप्रैषःपुत्रमिवपितरावश्विनोभेतियाज्याग्नेवीहीत्यनुवषट्कारः
सुरासुतस्याग्नेवीहीतिवा॥नानाहिवांदेवहितंसदस्कृतंमासंसृक्षाथांपरमेव्योमनि ॥ सुरात्वमसिशुष्मिणीतिसुरामवेक्ष्या
धोबाहूसोमएषइतिसोमंयदत्ररिप्तंरसिनःसुतस्यंयदिंद्रोअपिबच्छचीभिः ॥ इदंतदस्यमनसाशिवेनसोमंराजानमिहभ
क्षयामीतिभक्षजपःप्राणभक्षोत्र ॥ ९ ॥ विध्यपराधेप्रायश्चितिःशिष्टाभावेप्रतिनिधिरन्वाहिताग्नेःप्रयाणोपपत्तौपृथग
ग्नीन्नयेयुस्तुभ्यंताअंगिरस्तमेतिवाज्याहुतिंहुत्वासमारोपयेदयंतेयोनिर्ऋत्वियइत्यरणीगार्हपत्येप्रतितपेत्पाणीवायातेअ
ग्नेयज्ञियातनूस्तयेह्यारोहात्मात्मानमच्छावसूनिकृण्वन्नर्यापुरूणि ॥ यज्ञोभूत्वायज्ञमासीदयोनिंजातवेदोभुवआजाय
मानइत्येवमनन्वाहिताग्निरहुत्वायदिपाण्योररणीसंस्पृश्यमंथयेत्प्रत्यवरोहजातवेदःपुनस्त्वंदेवेभ्योहव्यंवहनःप्रजान
न् ॥ प्रजांपुष्टिंरयिमस्मासुधेह्यथाभवयजमानायशंयोरित्याहवनीयमवदीप्यमानमर्वाक्शम्यापरासादिदंतएकंपरऊ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तएकमितिसंवपेद्यदित्वतीयाद्यद्यमावास्यांपौर्णमासींवातीयाद्यदिवान्यस्याग्निषुयजेतयदिवास्यान्योग्निषुयजेतयदि
वास्यान्योग्निरग्नीन्व्यवेयाद्यदिवास्याग्निहोत्रउपसंनेहविषिवानिरुप्तेचक्रीवच्छापुरुषोवाविहारमंतरियाद्यदिवाध्वेप्रमी
येतेष्टिरग्निःपथिकृद्धेत्थाहिवेधोअध्वनआदेवानामपिपंथामगन्मेत्यनड्वान्दक्षिणाव्यवायेत्वनग्निनाप्रागिष्टेर्गामंतरेणा
तिक्रमयेद्धस्मनाशुनःपदंप्रतिवपेदिदंविष्णुर्विचक्रमइतिगार्हपत्याहवनीययोरंतरेभस्मराज्योदकराज्याचसंतनुयात्तंतु
तन्वन्नजसोभानुमन्विहीत्यनुगमयित्वाचाहवनीयंपुनःप्रणीयोपतिष्ठेतयदग्नेपूर्वंप्रहितंपदंहितेसूर्यस्यरश्मीनन्वाततान
। तत्ररयिष्ठामनुसंभवैतांसंनःसृजसुमत्यावाजवत्या । त्वमग्नेसप्रथाअसीतिचाध्वेप्रमीतस्याभिवान्यवत्सायाःपश्व
साग्निहोत्रंतूष्णींसर्वहुतंजुहुयुरासमवायाद्यद्याहिताग्निपरपक्षेम्रियेताहुतिभिरेनंपूर्वपक्षंहरेयुर्हविषांव्यापत्तावोह्यासुदे
वतास्वाज्येनेष्टिंसमाप्यपुनरिज्याव्यापन्नानिहवींषिकेशनखकीटपतंगैरन्यैर्वाबीभत्सैर्भिन्नसिक्तानिचापोभ्यवहरेयुःप्र
जापतेनत्वदेतान्यन्यइतिचवल्मीकवपायांवासान्नाय्यंमध्यमेनपलाशपर्णेनजुहुयाद्विष्यंदमानंमहीद्यौःपृथिवीचनइ
त्यंतःपरिधिदेशेनिवपेयुरन्यतरादोषेव्यासिच्यप्रचरेयुःपुरोळाशंवातत्स्थानंउभयदोषऐंद्राग्नंपंचशरावमोदनंतयोःपृथ
क्प्रचर्यैंद्रमेवेत्येकेवत्सानांधानेवायवेयवागूंमग्निहोत्रमधिश्रितंस्रवदभिमंत्रयेतगर्भंस्रवंतमगदमकर्माग्निर्होतापृथिव्यं
तरिक्षं । यतश्चुतदग्नावेवतन्नाभिप्राम्नोतिनिर्ऋतिंपरस्तादिति ॥ १० ॥ यस्याग्निहोत्र्युपावसृष्टादुह्यमानोपविशेत्ताम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिमंत्रयेतयस्माद्धीषानिषीदासिततोनोअभयंकृधि । पशून्नःसर्वान्गोपायनमोरुद्रायमीढुषइत्यथैनामुत्थापयेदुदस्था
देव्यदितिरायुर्यज्ञपतावधात् । इंद्रायकृण्वतीभागंमित्रायवरुणायचेत्यथास्याऊधसिचमुखेचोदपात्रमुपोद्गृह्यदु
ग्ध्वाब्राह्मणंपाययेद्यस्याभोक्ष्यन्स्याद्यावज्जीवंसंवत्सरंवावाश्यमानायैयवसंप्रयच्छेत्सूयवसाद्गवतीहिभूयाइतिशोणि
तंदुग्धंगार्हपत्येसंक्षाप्यान्येनजुहुयाद्भिन्नंसिक्तंवाभिमंत्रयेतसमुद्रंवःप्रहिणोमिस्वांयोनिमपिगच्छत । अरिष्टाअस्माकं
वीरामयिगावःसंतुगोपताविति यस्याग्निहोत्र्युपावसृष्टादुह्यमानास्पंदेतसायत्तत्रस्कंदयेत्तदभिमृश्यजपेद्यदद्यदुग्धंपृथि
वीमसृक्षयदोषधीरत्यसृपद्यदापः । पयोगृहेषुपयोअघ्न्यायांपयोवत्सेषुपयोअस्तुतन्मयीतितत्रयत्परिशिष्टंस्यात्तेनजुहुया
दन्येनवाभ्यानीयैतद्दोहनाद्याप्राचीनहरणात्प्रजापतेर्विश्वभृतितन्वंहुतमसीतितत्रस्कन्नाभिमर्शनंशेषेणजुहुयात्पुनरु
न्नीयाशेषआज्यमशेषएतदाहोमाद्वारुणींजपित्वावारुण्याजुहुयादनशनमान्यस्माद्धोमकालात्पुनर्होमंचगाणगारिरग्नि
होत्रंशरशरायत्समोषामुमितिद्वेष्टारमुदाहरेद्विष्यंदमानंमहीद्यौःपृथिवीचनइत्याहवनीयस्यभस्मांतेनिनयेत्सान्नाय्यव
द्वीभत्सेभिवृष्टेमित्रोजनान्यातयतिब्रुवाणइतिसमिदाधानंयत्रवेत्थवनस्पतइत्युत्तरस्याआहुत्यास्कंदने ॥११॥ प्रदोषा
तोहोमकालःसंगवांतःप्रातस्तमतिनीयचतुर्गृहीतमाज्यंजुहुयाद्यदिसायंदोषावस्तर्नमःस्वाहेतियदिप्रातःप्रातर्वस्तर्नमः
स्वाहेत्यग्निहोत्रमुपसाद्यभूर्भुवःस्वरितिजपित्वावरंदत्त्वाजुहुयादिष्टिश्चवारुणीहुत्वाप्रातर्वरदानमनुगमयित्वाचाहव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीयैपुनःप्रणयैदिहैवक्षेम्यएधिमाग्रहासींरमुंमामुंमामुष्यायणमितिततइष्टिर्मित्रःसूर्योभियोमहिनादिवं । प्रसमित्रम
र्तोअस्तुप्रयस्वानितिसंस्थितायांपत्न्यासहवाग्यतोग्नीन्ज्वलतोहरन्नश्नन्नुपासीतद्वयोर्दुग्धेनवासेग्निहोत्रंजुहुयादधिश्रि
तेन्यस्मिन्द्वितीयमवनयैत्प्रातरिष्टिरग्निव्रतभृत्स्वमग्नेव्रतभृच्छुचिरग्नेदेवाँइहावह । उपयज्ञंहविश्चनः । व्रतानिबिभ्रद्व
तपाअदब्धोयजानोदेवाँअजरःसुवीरः ॥ दधद्रत्नानिसुमृळीकोअग्नेगोपायनोजीवसेजातवेदइत्येषैवार्त्याश्रुपातेयद्याह
वनीयमप्रणीतमभ्यस्तमियाद्धुविद्ब्राह्मणोग्निंप्रणयेद्भौर्हिरण्येग्रतोहियमाणेभ्युदितेचतुर्गृहीतमाज्यंरजतंचहिरण्यव
दग्रतोहरेयुरथैतदाज्यंजुहुयात्पुरस्तात्प्रत्यङ्मुखउपविश्योषाःकेतुनाजुषतांस्वाहेतिकालात्ययेनशेषोनत्विहाग्निरनुग
म्यंआहवनीयेचेद्भ्रियमाणेगार्हपत्योनुगच्छेत्स्वेभ्यएनमवक्षामेभ्योमंथेयुरनुगमयेत्वितरंक्षामाभावेभस्मनारणीसंस्पृ
श्यमंथयेदितोजज्ञेप्रथममेभ्योयोनिभ्योअधिजातवेदाः । सगायत्र्यात्रिष्टुभाजगत्यानुष्टुभाचदेवेभ्योहव्यंहवनःप्रजा
नन्नितिमथित्वाप्रणीयाहवनीयमुपतिष्ठतांग्नेसम्राळिषेरायेरमस्वसहसेद्युम्नायोर्जेपत्याय । सम्राळसिस्वराळसि
सारस्वतौत्वोत्सौप्रावतांमन्नादंत्वान्नपत्यायादधइत्यतएवैकेप्रणयैत्यन्वाहृत्यदक्षिणंसहभस्मानंवागार्हपत्यायतनेनि
धायाथप्राञ्चमाहवनीयमुद्धरैत्ततइष्टिरग्निस्तपस्वान्जनद्वान्पावकवानायाहितपसाजनेष्वग्नेपावकोअर्चिषा । उपेमां
सुष्टुतिंमम । आनोयाहितपसाजनेष्वग्नेपावकदीद्यत् । हव्यादेवेषुनोदधदितिप्रणीतेनुगतेप्राग्घोमादिष्टिरग्निर्ज्योति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्मान्वरुणउदग्नेशुचयस्तवाग्नेबृहन्नुषसामूर्ध्वोअस्थादितिंसवांश्चेदनुगतानादित्योभ्युदियाद्वाभ्यस्तमियाद्वाग्न्याधेयंपु
नराधेयंवासमारूढेषुचारणीनाशे ॥ १२ ॥ अथाग्नेय्यइष्टयोव्रतातिपत्तौव्रतपतयेसान्नावग्निप्रणयनेग्निवतेक्षामायागा
रदाहेशुचयेसंसर्जनेग्निनान्येनमिथश्चेद्विविचयेगार्हपत्याहवनीययोर्वीतयेग्राम्येणसंवर्गायवैद्युतेनाप्सुमतेवैश्वानराय
विमतानामन्नभोजनएषैवकपालेनष्टेनुद्वासितेभ्याश्रावितेवासुरभयएवंयस्मिन्जीवेमृतशब्दस्त्वमग्नेव्रतपाअसियद्वोव
यंप्रमिनामव्रतान्यग्निनाग्निःसमिध्यतेत्वंह्यग्नेअग्निनाग्नेत्वमस्मद्युयोध्यमीवाअक्रंददग्निस्तनयन्निवद्यौर्वीतेविष्विग्वातजू
तासोअग्नेत्वामग्नेमानुषीरीळतेविशोग्नआयाहिवीतयेयोअग्निंदेववीतयेकुवित्सुनोगविष्टयेमानोअस्मिन्महाधनेप्स्वग्नेस
धिष्टवंयदग्नेदिविजाअस्यग्निर्होतान्यसीदद्यजीयान्त्साध्वीमकर्देववीतिंनोअद्येतियस्यभार्यागौर्वायमौजनयेदिष्टिर्मरु
तःसान्नाय्येपुरस्ताच्चंद्रमसाभ्युदितेग्निर्दातेंद्रःप्रदातविष्णुःशिपिविष्टोग्नेदादाशुषेरयिंसयंताविप्रएषोदीर्घस्तेअस्त्वंकु
शोभद्रातेहस्तासुकृतोतपाणीवषट्तेविष्णवासऽआकृणोमिंप्रतत्तेअद्यशिपिविष्टनामेत्यपिवाप्रायश्चित्तेष्टीनांस्थानेतस्यै
तस्यैदेवतायैपूर्णाहुतिंजुहुयादितिविज्ञायतेहविषांस्कन्नमभिमृशेद्देवांजनमगन्यज्ञंस्तस्यमाशीरवंतुवर्धतां ॥ भूतिर्घृते
नमुंचतुयज्ञोयज्ञपतिमंहसः ॥ भूपतयेस्वाहाभुवनपतयेस्वाहाभूतानांपतयेस्वाहा ॥ यज्ञस्यत्वाप्रमयोन्मयाभिमया
प्रतिमयाद्रप्सश्चस्कंदेत्याहुतिश्चेद्बहिष्परिध्याग्नीध्रएनांजुहुयाद्धुतवतेपूर्णपात्रंदद्याद्देवतेअनुवाक्येयाज्येवाविपरिहृत्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्येअवदानेहविषीवायद्वोदेवाअतिपातयानिंवाचाचप्रयुतीदेवहेळनं ॥ अरायोअस्माँअभिदुच्छुनायतेंन्यत्रास्मन्मरुस्तन्निधेतनस्वाहेत्याज्याहुतिंहुत्वामुख्यंधनंदद्यात्स्थानिनीमनावाह्यदेवतांमुपोत्थायावाहयेंन्मनसेत्येकंआज्येनास्थानिनींयजेत् ॥१३॥ हविषिदुःशृतेंचतुःशरावमोदनंब्राह्मणान्भोजयेंत्क्षामेशिष्टेनेष्ट्वापुनर्यजेताशेषेपुनरावृत्तिःप्रागावाहनाच्चदोषेंप्यत्यंतंगुणभूतानांप्राक्स्विष्टकृतउक्तंप्रधानभूतानांमवदानदोषेपुनरायतनादवदानंद्वेष्ट्रेत्विहदक्षिणांदद्यादक्षिणादानउर्वरांदद्यात्कपालंभिन्नमनपवृत्तकर्मंगायत्र्यात्वाशताक्षरयासंदधामीतिसंधायापोभ्यवहरेयुरभिन्नोघृर्मोज्रीरदानुर्यत्आर्त्तस्तदंगन्पुनंः॥ इध्मोवेदिःपरिधयश्चसर्वेयज्ञस्यायुरनुसंतरंतु ॥ त्रयस्त्रिंशत्तंतवोयान्वितन्वतइमंयज्ञंस्वधजायेयजंते ॥ तेभिश्छिद्रंप्रतिदध्मोयजत्रंस्वाहायज्ञोअप्येतुदेवांनित्येवमवलीढाभिःक्षिप्तेष्वपएवान्यानिमृन्मयानिंभूमिर्भूमिमगान्मांतामातरमप्यगात्॥ भूयास्मपुत्रैःपशुभिर्योनोद्वेष्टिसभिद्यतामितियदिपुरोळाशःस्फुटेद्वोत्पतेतवाबर्हिष्येनंनिधायाभिमंत्रयेतकिमुत्पतसिकिमुत्प्लोष्ठाःशांतःशांतेरिहागंहि ॥ अघोरोयज्ञियोभूत्वासीदसदनंस्वमासीदसदनंस्वमितिमाहिंसीर्देवप्रेरितआज्येनतेजसाज्यस्वमानःकिंचनरीरिषः। योगक्षेमस्यशांत्याअस्मिन्नासीदबर्हिषीत्यग्निहोत्रायकालेग्नावजायमानेप्यन्यमानीयजुहुयुंःपूर्वालाभउत्तरोत्तरंब्राह्मणपाण्यजकर्णंदर्भस्तंबाप्सुकाष्ठेषुपृथिव्यांहुत्वात्वापिमंथनंपाणौचेद्वासेनवरोधंःकर्णेचेन्मांसवर्जनंस्तंबेचेन्नाधिशयीताप्सुचेदविवेकंएतत्सांवत्सरव्रतंयावज्जीविकंवाग्नावनु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गतँतराहुतींहिरण्यउत्तरांजुहुयाद्धिरण्यउत्तरांजुहुयात् ॥१४॥ इत्याश्वलायनश्रौतसूत्रेपूर्वषट्केतृतीयोऽध्यायः ॥ ३ ॥

हरिः ॐ३म् ॥ दर्शपूर्णमासाभ्यामिष्ट्वेष्टिपशुचातुर्मास्यैरथसोमेनोर्ध्वंदर्शपूर्णमासाभ्यांयथोपपत्त्येकेप्रागपिसोमेनैकें तस्यर्त्विजश्चत्वारस्त्रिपुरुषास्तस्यतस्योत्तरेत्रयोंहोतामैत्रावरुणोच्छावाकोग्रावस्तुदंध्वर्युःप्रतिप्रस्थातानेष्टोन्नेतांब्रह्माब्राह्मणाच्छंस्याग्नीध्रःपोतोंद्गाताप्रस्तोताप्रतिहर्तासुब्रह्मण्यइत्येतेहानैकाहैर्याजयंत्येतएवाहिताग्नयइष्टप्रथमयज्ञांगृहपतिससदशांदीक्षित्वासमोप्याग्नींस्तन्मुखाःसत्राण्यासतेंतेषांसमावापार्दियथार्थमभिधानमैष्टिकेतंत्रेंदीक्षणाद्यनग्नीनांमग्निर्मुखमितिचयाज्यानुवाक्ययोर्दंडप्रदानेप्रैषेषुनिवित्सुंघृतयाज्यायांकुह्वांचाच्छावाकनिगदोपहवप्रत्युपहवेचार्षेयाणिंगृहपतेःप्रवरित्वांत्मादीनांमुख्यानामेंवंद्वितीयतृतीयचतुर्थानांयावंतोनंतर्हिताःसमानगोत्रांस्तावतांसकृदावर्तयेद्वांद्रव्यान्वयाःसंस्कारांःसाग्निचित्येषुक्रतुषूंखासंभरणीयामिष्टिमेकेंग्निर्ब्रह्मण्वानग्निःक्षत्रवानग्निःक्षत्रभृंदेतेनाग्नेब्रह्मणावावृधस्वंब्रह्मचतेजातवेदोनमश्चंपुरूण्यग्नेपुरुधात्वायांसचित्रचित्रंचितयंतमस्मैं । अग्निरीशेबृहतःक्षत्रियस्यार्चामितेसुमतिंधोष्यर्वागितींदंप्रभृतिकर्मणांशनैस्तरामुत्तरोत्तरंमेतत्त्वपिपौर्णमासांत्प्रायणीयावत्सोमप्रवहणंमूर्ध्वंप्रथमायाअग्निप्रणयनीयायांऔपवसथ्येनियमोमध्यमादिघर्मे ॥ १ ॥ दीक्षणीयायांधाय्येविराजावग्नाविष्णू ॥ अग्निर्मुखंप्रथमोदेवतानांसंगतानामुत्तमोविष्णुरासीत् ॥ यजमानायपरिगृह्यदेवान्दीक्षयेदंहविरागच्छतंनः ॥ अग्निश्चविष्णोतपउत्तमंमहो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दीक्षापालायवनतंहिशक्रा ॥ विश्वैर्देवैर्यज्ञियैःसंविदानौदीक्षामस्मैयजमानायधत्तमितिसाग्निचित्येत्रीण्यन्यानिवै
श्वानरआदित्याःसरस्वत्यदितिर्वाधारयंतआदित्यासोजगत्स्थाइतिद्वेएतेएवभुवद्वह्न्योभुवनपतिभ्योवानेदमादिषुमा
र्जनंमर्वागुदयनीयायाइदमादीळायांसूक्तवाकेचागूराशीस्थानंउपहूतोयंयजमानोस्ययज्ञस्यागुरउद्दचमशीयेतितस्मि
न्नुपहूतआशास्तेयंयजमानोस्ययज्ञस्यागुरउद्दचमशीयेत्याशास्तेनचात्रनामादेशःप्रकृत्यांत्यऊर्ध्वंपश्चिळायादीक्षितानां
संचरोगार्हपत्याहवनीयावंतराग्नेःप्रणयनाद्दीक्षणादिरात्रिसंख्यानेनदीक्षाअपरिमिताएकाहप्रभृत्यासंवत्सरात्संवत्सरं
त्वेवसत्रतेद्वादशाहतापश्चितेषुयथासुत्योपसदःकर्माचारस्त्वेकाहानामेकातिस्रोवादीक्षास्तिस्रउपसदःसुत्यमहरुत्तमंदी
क्षांतेराजक्रयः ॥ २ ॥ तदहःप्रायणीयेष्टिःपथ्यास्वस्तिरग्निःसोमःसवितादितिःस्वस्तिनःपथ्यासुधन्वस्वितिद्वेअग्ने
नयसुपथारायेअस्मानादेवानामपिपंथामगन्मंत्वंसोमप्रचिकितोमनीषायातेधामानिदिवियापृथिव्यांमाविश्वदेवंसत्प
तिंयइमाविश्वाजातानिंसुत्रामाणंपृथिवींद्यामनेहसैंमहीमूषुमातरंसुव्रतानौसेदग्निरग्नींरत्यस्त्वन्यानितिद्वेसंयाज्यैशंय्वं
तेयमनाज्यभागासंस्थितायां ॥ ३ ॥ राजानंक्रीणंतितंप्रवक्ष्यत्सुपश्चादनसस्त्रिपदमात्रैंऽतरेणवर्त्मनीअवस्थायप्रे
षितोग्रेभिहिंकारात्त्वंविप्रस्त्वंकविस्त्वंविश्वानिधारयन् ॥ अपजन्यंभयंनुदेत्यस्पंदयन्पाष्णींप्रपदेनदक्षिणापांसूस्त्रि
रुदुप्यानुब्रूयाद्भद्रादभिश्रेयःप्रेहिंबृहस्पतिःपुरएतातेअस्तु ॥ अथेमवस्यवरआपृथिव्यांआरेशत्रून्कृणुहिसर्ववीरइतिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिष्ठन्ननुव्रजन्नुत्तरांअंतरेणैववर्त्मनीसोमयास्तेमयोभुवइतितिस्रःसर्वेनंदंतियशसागतेनांगन्देवक्रतुभिर्वर्धतुक्षयमित्य
र्धर्चआरमैदवस्थितेनसिदक्षिणात्पक्षादभिक्रम्यराजानमभिमुखोवतिष्ठतेप्रपाद्यमानेराजन्यग्रेणानोनुसंव्रजेद्यातेधा
मानिहविषायजंतीमांधियंशिक्षमाणस्यदेवेतिनिहितेपरिदध्याद्राजानमुपस्पृशन्वसनेशुषुवा ॥ ४ ॥ अथातिथ्येळां
तांतस्याअग्निमंथनैधाय्येअतिथिमंतौसमिधाग्निंदुवस्यतांप्यायस्वसमेतुतइतिविष्णुरिदंविष्णुर्विचक्रमेतदस्यप्रियम
भिपाथोअश्यांहोतारंचित्ररथमध्वरस्यप्रप्रायमग्निर्भरतस्यशृण्वइतिसंयाज्येसंस्थितायामाज्यैतानूनप्त्रंकरिष्यंतोभि
मृशंत्यनाधृष्टमस्यनाधृष्यैदेवानामोजोअभिशस्तिपाः ॥ अनभिशस्त्यंजसासत्यमुपगेषांस्वितेमाधाइतिस्पृष्ट्वोदकैंरा
जानमाप्याययंतीदमादिमदंतीरबर्थउपसत्स्वंशुरंशुष्टेदेवसोमाप्यायतामिंद्रायैकधनिविदेआतुभ्यमिंद्रःप्यायतामात्व
मिंद्रायप्यायस्वाप्याययास्मान्सखीन् ॥ सन्यामेधयास्वस्तितेदेवसोमसुत्यामुदृचमशीयेतिस्पृष्ट्वोदकंनिह्नुवंतेप्रस्तरे
पाणीन्निधायोत्तानांदक्षिणान्त्सव्यांनीचैएष्टारायएष्टावामानिप्रेषेभगाय ॥ ऋतमृतवादिभ्योनमोदिवेनमःपृथिव्या
इति ॥ ५ ॥ स्पृष्ट्वोदकंप्रवर्ग्येणचरिष्यत्सूत्तरेणखरंपरिव्रज्यपश्चादस्योपविश्यप्रेषितोभिष्टुयाद्दगावानमृचमृचंमनवा
नमुक्त्वाप्रणुत्यावस्यैद्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः ॥ सबुध्याउपमाअस्यविष्ठाःसतश्चयोनिमस
तश्चविवः ॥ इयंपित्रेराष्ट्र्येत्यग्रेप्रथमायजनुषेभूमनेष्ठाः ॥ तस्माएतंसुरुचंह्वारमह्यैधर्मंश्रीणंतिप्रथमस्यधासेः ॥ महा

न्महीअस्तभायद्द्विजातोद्यांपितासद्मपार्थिवंचरजः ॥ सबुध्नादाष्टजनुषाभ्युग्रैंबृहस्पतिर्देवतातस्यसम्राट् ॥ अभि
त्यंदेवंसवितारमोण्योःकविक्रतुमर्चामिसत्यसवँरत्नधामभिप्रियंमतिंकविं ॥ ऊर्ध्वायस्यामतिर्भाअदिद्युतत्सवीमनिं
हिरण्यपाणिरमिमीतसुक्रतुःकृपास्वंस्तृपास्वरितिवांसंसीदस्वमहाँअसीतिसंसाद्यमानैंजंतियंप्रथयंतोनविप्राइत्यज्यमा
नैंपतंगमक्तमसुरस्यमायया योनःसनुत्योअभिदासदग्नैंभवानोअग्नेसुमनाउपेताविति द्वृचाःकृणुष्वपाजःप्रसितिंनपृथ्वी
मितिपंचपरित्वागिर्वणोगिरोधिद्वयोरदधाउक्थ्यंवचःशुक्रंतेअन्यद्यजतंतेअन्यदपश्यंगोपामनिपद्यमानंत्रकेद्रप्सस्या
यंवेनश्चोदयत्पृश्निगर्भाःपवित्रंतेवितंतंब्रह्मणस्पतइतिद्वैवियत्पवित्रंधिषणाअतन्वतधर्मशोचंतंप्रणवेषुबिभ्रतः ॥ समु
द्रेअंतरायवोविचक्षणंत्रिरह्नोनामसूर्यस्यमन्वत ॥ गणानांत्वाप्रथश्चयस्यापश्यंत्वेत्येतस्याद्ययायजमानमीक्षतैद्वि
तीययापत्नींतृतीययात्मानैंकाराधद्धोत्राश्विनावामितिनवाभात्यग्निर्ग्रावाणेवैळेद्यावापृथिवीइतिप्रागुत्तमायाअरूरुच
दुषसःपृश्निरग्रियइत्यावपेतौत्तरेणार्धचैंनपत्नीमीक्षेतौत्तमयापरिहितेसमुत्थाप्यैनानध्वर्यवोवाचयंतीतिनुपूर्वंपटलम्
॥ ६ ॥ अथोत्तरमुपविष्टेष्वध्वर्युर्घर्मदुघामाह्वयतिससंप्रैषउत्तरस्यानभिहिंकृत्योपह्वयेसुदुघांधेनुमेतामितिद्वैअभि
त्वादेवसवितःसमीवत्संनमातृभिःसंवत्सइवमातृभिर्यस्तेस्तनःशशयोयोमयोभूर्गौरमीमेदनुवत्संमिषंतैनमसेदुपसीदत
संजानानाउपसीदन्नभिज्ञ्वांदशभिर्विवस्वतोदुहंतिसप्तैकांसामद्धोअग्निरश्विनातप्तोवांघर्मआगतं ॥ दुह्यंतेगावोबृषणेह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धेनवोदस्रामदंतिकारवः ॥ समिद्धोअग्निर्वृणारतिर्दिवस्तप्तोघर्मोदुह्यतेवामिषेमधु ॥ वयंहिवापुरुतमासोअश्विना
हवामहेसधमादेषुकारवः ॥ तदुप्रयक्षतममस्यकर्मात्मन्वन्नभोदुह्यतेघृतंपयउत्तिष्ठब्रह्मणस्पतइत्येतामुक्त्वावतिष्ठतेदु
ग्धायामधुक्षत्पिप्युषीमिषमित्याह्रियमाणउपद्रवपयसागोधुघोषमाघर्मेसिंचपयउस्रियायाः ॥ विनाकमख्यत्सवि
तावरेण्योनुद्यावापृथिवीसुप्रणीतिरित्यासिच्यमानआनूनमश्विनोर्ऋषिरितिगव्यआसुतेसिंचताश्रियमित्याजआसिक्त
योःसमुत्येमहतीरपइतिमहावीरमादायोत्तिष्ठत्सूदुष्यदेवःसविताहिरण्ययेत्यनुत्तिष्ठैत्प्रैतुब्रह्मणस्पतिरित्यनुव्रजेज्जंधर्व
इत्थापदमस्यरक्षतीतिखरमवेक्ष्यतमतिक्रम्यनाकेसुपर्णमुपयत्पतंतमितिसमाप्यप्रणवेनोपविशेदनिरस्यतृणंप्रेषितोयज
तितप्तोवांघर्मोनक्षतिस्वहोतांप्रवामध्वर्युश्चरतिप्रयस्वान् ॥ मधोर्दुग्धस्याश्विनातनायावीतंपातंपयसउस्रियायाः ॥
उभापिबतमश्विनेतिचोभाभ्यामनवानमग्नेवीहीत्यनुवषट्कारोघर्मस्याग्नेवीहीतिवाब्रह्मावषट्कृतेजपत्यनुवषट्कृतेचविश्वाआशादक्षिणसाद्विश्वान्देवानयाळिह ॥ स्वाहाकृतस्यघर्मस्यमध्वःपिबतमश्विनेत्येवमेवापराह्णिकेयदुस्रियास्वाहुतंघृतंपयोयंसवामश्विनाभागआगतं ॥ माध्वीधर्तारावदथस्यसत्पतीतप्तंघर्मंपिबतंसोम्यंमधु ॥ अस्यपिबतमश्विनेतिचाप्रेषितोहोतानुवषट्कृतेस्वाहाकृतःशुचिर्देवेषुघर्मोयोअश्विनोश्चमसोदेवपानः ॥ तमींविश्वेअमृतासोजुषाणागंधर्वस्यप्रत्यास्नारिहंति ॥ समुद्रादूर्मिमुदियर्तिवेनोद्रप्सःसमुद्रमभियज्जिगाति ॥ सखेसखायमभ्याववृत्स्वो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्ध्वऊषुणऊतयइतिद्वेतंघेमित्थानमस्विनइतिप्रागाथींपूर्वाह्णेकाण्वीमपराह्णैन्यतरांवात्यंतंकाण्वींत्वेवोत्तमेपावकशोचे
तवहिक्षयंपरीत्युक्त्वाभक्षमाकांक्षेद्वाजिनेनभक्षोपायोहुतंहविर्मधुहविरिंद्रतमेग्नावश्यामतेदेवघर्म ॥ मधुमतःपितुम
तोवाजवतोंगिरस्वतोनमस्तेअस्तुमामाहिंसीरितिभक्षजपःकर्मिणोघर्मभक्षयेयुःसर्वेतुदीक्षिताःसर्वेषुदीक्षितेषुगृहपतेस्तृ
तीयोत्तमौभक्षौसंप्रेषितःश्येनोनयोनिंसदनंधियाकृतंमायस्मिन्त्सप्तवासवारोहंतुपूर्व्यारुहः ॥ ऋषिर्हदीर्घश्रुत्तमंमिंद्रस्य
घर्मोअतिथिः ॥ सूयवसाद्भगवतीहिभूयाइतिपरिदध्यादुत्तमेप्रागुत्तमायाहविर्हविष्मोमहिसन्नदैव्यमित्यावपेत ॥ ७ ॥
अथोपसत्तस्यांपित्र्ययाजपाःप्रादेशोपवेशनेचप्रकृत्येहोपस्थउपसद्यायमीह्रुषइतितिस्रएकैकांत्रिरनवानंताःसामिधेन्य
स्तासामुत्तमेनप्रणवेनाग्निंसोमंविष्णुमित्यावाह्योपविशेन्नावाहयेदित्येकेनावाहनेप्येताएवदेवताअग्निर्वृत्राणिजंघनद्ध
उग्रइवशर्यहात्वंसोमासिसत्पतिर्गयस्फानोअमीवहेदंविष्णुर्विचक्रमेत्रीणिपदाविचक्रमइतिस्विष्टकृदादिलुप्यतेप्रया
जाआज्यभागौचनित्यमाप्यायनेनिह्नवश्चैषवापराह्णइमांमेअग्नेसमिधंमिमामितितुसामिधेन्योविपर्यासोयाज्यानुवा
क्यानांपाण्योश्चनिह्नवइत्युपसदःसुपूर्वाह्णेस्वपराह्णेचराजक्रयाद्यहःसंख्यानेनैकाहानांतिस्रःषड्डाहीनानांद्वादशचतुर्वि
शतिःसंवत्सरइतिसत्राणांप्रथमयज्ञेनैकेघर्ममौपवसथ्यउभेपूर्वाह्णेप्रथमस्यामुपसदिवृत्तायांप्रेषितःपुरीष्यचितयेन्वाहहो
तादीक्षितश्चैद्यजमानोदीक्षितेपश्चात्पदमात्रेवस्थायाभिहिंकृत्यपुरीष्यासोअग्नयइतित्रिरुपांशुसप्रणवांमपिवासुमंद्रंव्रज

॥ २५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्स्वनुव्रजेत्तिष्ठत्सुविसृष्टवाक्प्रणयतेतिब्रूयादथाग्निंसंचितंमनुगीतमनुशंसेत्पश्चादग्निपुच्छस्योपविश्याभिहिंकृत्याग्निर
स्मिजन्मनाजातवेदाइतितिस्रिर्मध्यमयावाचैतस्मिन्नेवासनेवैश्वानरीयस्ययजतित्रयमेतत्साग्निचित्येब्रह्माप्रतिरथंजपि
त्वादक्षिणतोग्नेर्बर्हिर्वेद्यास्तऔदुंबर्याभिहवनादुक्कमग्निप्रणयनंदीक्षितस्तुवसोर्धारामुपसर्पेत् ॥८॥ हविर्धानेप्रवर्तयंतित
दुक्तंसोमप्रवहणेनंदक्षिणस्यतुहविर्धानस्यौत्तरस्यचक्रस्यांतरावर्त्मपादयोर्युंजेवांब्रह्मपूर्व्यनमोभिःप्रेतांयज्ञस्यशंभुवांयु
वांयमेइवयतमानेयदैतंमधिद्वयोरदधाउक्थ्यंवचइत्यर्धर्चआरभेदव्यवस्ताचेद्रराटींविश्वारूपाणिप्रतिमुंचतेकविरिति
व्यवस्तायांमेथ्योरुपनिहतयोःपरित्वागिर्वणोगिरइतिपरिदध्यात् ॥९॥ अग्नीषोमौप्रणेष्यत्सुतीर्थेनप्रपद्योत्तरेणाग्नीध्री
यायतनंसदश्चंपूर्वयाद्वारापत्नीशालांप्रपद्योत्तरेणशालामुखीयमतिव्रज्यपश्चादस्योपविश्यप्रेषितोनुब्रूयात्सावीर्हिदेवप्र
थमायपित्रेवष्मार्णमस्मैवरिमाणमस्मै ॥ अथास्मभ्यंसवितःसर्वतातांदिवेदिवआसुवाभूरिपश्वइत्यासीनोनुव्रजन्नुत्तरांः
प्रैतुब्रह्मणस्पतिर्होतादेवोअमर्त्यःपुरस्तादुपत्वाग्नेदिवेदिवेदोषावस्तरुपप्रियंपनिग्नतमित्यर्धर्चआरभेदाग्नीध्रीयेनिहिते
भिहूयमानेग्नेजुषस्वप्रतिहर्यतद्वचइतिसमाप्यप्रणवेनोपरमेदुत्तरेणाग्नीध्रीयमतिव्रजत्स्वतिव्रज्यसोमोजिगातिगातुविदे
वानौतमस्यराजावरुणस्तमश्विनेत्यर्धर्चआरभेत्प्रपाद्यमानंराजानमनुप्रपद्येताऽतश्चप्रागाअदितिर्भवासिश्येनोनयोनिं
सदनंधियाकृतंमस्तभ्नाद्द्यामसुरोविश्ववेदाइतिपरिदध्यादुत्तरयावाक्षेमाचारैब्रह्मैवमेवप्रपद्यापरेणवेदिमतिव्रज्यदक्षि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णतःशालामुखीयस्योपविशेत्सहोतारमनूत्थायंयथेतमग्रतोव्रजेद्यदिराजानंप्रणयेदुक्तमप्रणयतःप्राप्यहविर्धानेगृहपत
येराजानंप्रदायंहविर्धानेअग्रेणापरेणवातिव्रज्यंदक्षिणतआहवनीयस्योपविशेदग्निपुच्छस्यसाग्निचित्यायामेतद्ब्रह्मासनं
पशौप्रातश्चावपाहोमाद्यदित्वग्रेणप्रत्येयात्प्रपाद्यमाने ॥ १० ॥ अथाग्नीषोमीयेणचरंत्युत्तरवेद्यामादंडप्रदानादंडंप्रदा
यमैत्रावरुणमग्रतःकृत्वोत्तरेणहविर्धानेअतिव्रज्यंपूर्वयाद्वारासदःप्रपद्योत्तरेणयथास्वंधिष्ण्यावतिव्रज्यंपश्चात्स्वस्यधि
ष्ण्यस्योपविशतिहोतावतिष्ठतइतरोयदिदेवसूनांहवींष्यन्वायातयेयुरग्निर्गृहपतिःसोमोवनस्पतिःसवितासत्यप्रसवोबृ
हस्पतिर्वाचस्पतिरिंद्रोज्येष्ठोमित्रःसत्योवरुणोधर्मपतीरुद्रःपशुमान्पशुपतिर्वा ॥ त्वमग्नेबृहद्भयोहव्यवाळग्निजरःपि
तानस्त्वंचसोमनोवशोब्रह्मादेवानांपदवीःकवीनांमाविश्वदेवंसत्पतिंनप्रमियेसवितुर्दैव्यस्यतद्बृहस्पतेप्रथमंवाचोअग्रं
हंसैरिवसखिभिर्वावदद्भिःप्रससाहिषेपुरुहूतशत्रूंन्भुवत्स्वमिंद्रब्रह्मणामहांननमीवासइळयामदंतःप्रसमित्रमर्तोअस्तुप्र
यस्त्वांस्त्वान्नष्टवान्महिमायपृच्छतेत्वयाबद्धोमुमुक्षते ॥ त्वंविश्वस्माद्भुवनात्पासिधर्मणासुर्यात्पासिधर्मणा ॥ यत्किंचे
दंवरुणदैव्येजनउपतेस्तोमान्पशुपाइवाकरमितिद्वे ॥ ११ ॥ यद्युवैसर्वपृष्ठान्यग्निर्गायत्रस्त्रिवृद्राथंतरोवासंतिकइंद्रस्त्रै
ष्टुभःपंचदशोबार्हतोग्रैष्मोविश्वेदेवाजागताःसप्तदशावैरूपावार्षिकामित्रावरुणावानुष्टुभावेकविंशोवैराजोशारदोबृह
स्पतिःपांक्तस्त्रिणवःशाक्करोहैमंतिकःसवितातिच्छंदास्त्रयस्त्रिंशोरैवतःशैशिरोदितिर्विष्णुपत्न्यनुमतिः ॥ समिद्विशामा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शयानःस्वर्विन्मधुरेतोमाधवःपात्वस्मान् ॥ अग्निर्देवोदुष्टरीतुरदाभ्यइदंक्षत्रंरक्षतुपात्वस्मान् ॥ रथंतरंसामभिःपात्व
स्मान्गायत्रीछंदसांविश्वरूपा ॥ त्रिवृन्नोविष्टयास्तोमोअह्नांसमुद्रोवातइदमोजःपिपर्तु ॥ उग्रादिशामभिभूतिर्वयो
धाःशुचिःशुक्रेअहन्योजसीनां ॥ इंद्राधिपतिःपिपृतादतोनोमहिक्षत्रंविश्वतोधारयेदं ॥ बृहत्सामक्षत्रभृद्वृद्धवृष्ण्यंत्रि
ष्टुभौजःशुभितमुग्रवीरं ॥ इंद्रस्तोमेनपंचदशेनमध्यमिदंवातेनसगरेणरक्ष ॥ प्राचीदिशांसहयशायशस्वतीविश्वेदेवाः
प्रावृषाह्नांस्वर्वती ॥ इदंक्षत्रंदुष्टरमस्त्वोजोऽनाधृष्यंसहस्यंसहस्वत् ॥ वैरूपेसामंनिहतच्छकेयंजगत्यैनंविक्ष्वावेशया
नि ॥ विश्वेदेवाःसप्तदशेनवर्चइदंक्षत्रंसलिलवातमुग्रं ॥ धर्त्रीदिशांक्षत्रमिदंदाधारोपस्थाशानांमित्रवदस्त्वोजः ॥
मित्रावरुणाशरदाह्नांचिकित्वमस्मैराष्ट्रायमहिशर्मयच्छतं ॥ वैराजेसामन्नधिमेमनीषानुष्टुभासंभृतंवीर्यंसहः ॥ इदंक्ष
त्रंमित्रवदार्द्रदानुंमित्रावरुणारक्षतमाधिपत्ये ॥ सम्राट्दिशांसहसान्नीसहस्वत्यृतुर्हेमंतोविष्टयानःपिपर्तु ॥ अवस्युवा
ताबृहतीनुशक्करींमंयज्ञमवतुनोघृताचीं ॥ स्वर्वतीसुदुघानःपयस्वतीदिशांदेव्यवतुनोघृताची ॥ त्वंगोपाःपुरएतोतप
श्वांबृहस्पतेयाम्यांयुङ्ग्धिवाचं ॥ ऊर्ध्वादिशांरंतिराशौषधीनांसंवत्सरेणसवितानोअह्ना ॥ रैवत्सामातिच्छंदाउच्छंदो
ऽजातशत्रुःस्योनानोअस्तु ॥ स्तोमत्रयस्त्रिंशेभुवनस्यपत्नीविवस्वद्धातेअभिनोगृणीहि ॥ घृतवतीसवितराधिपत्यैपय
स्वतीरंतिराशानोअस्तु ॥ ध्रुवादिशांविष्णुपद्म्यघोरास्येशानासहसोयामनोता ॥ बृहस्पतिर्मातरिश्वोतवायुःसंध्वाना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाताअभिनोगृणंतु ॥ विष्टंभोदिवोधरुणःपृथिव्याअस्येशानाजगतोविष्णुपत्नी ॥ व्यचस्वतीषयंतीसुभूतिंःशिवानो
अस्त्वदितेरुपस्थे ॥ अनुनोद्यानुमतिर्यज्ञंदेवेषुमन्यतां ॥ अग्निश्चहव्यवाहनोभवतंदाशुषेमयः ॥ अन्विदनुमतेत्वंम
न्यासैशंचनस्कृधि ॥ ऋत्वेदक्षायनोहिनुप्रणआयूंषितारिषदितिंवैश्वानरीयंनवमंकायंदशमंकोअद्ययुंक्तेधुरिगाऋतस्ये
तिद्वेऔपयजैरंगारैरनभिपरिहारेप्रयतेरन्नाग्नीध्रीयाच्चेदुत्तरेणहोतारंशामित्राच्चेदक्षिणेनमैत्रावरुणमुपोत्थानमग्रेकृत्वा
निष्क्रम्यवेदंगृह्णीयान्नेदमादिषुहृदयशूलमर्वागनूबंध्यायाःसंस्थितेवसतीवरीःपरिहरंतिदीक्षिताअभिपरिहारयेरन्
॥१२॥ अथैतस्यारात्रेर्विवासकालेप्राग्वयसांप्रवादात्प्रातरनुवाकायामंत्रितोवाग्यतस्तीर्थेनप्रपद्याग्नीध्रीयेजान्वाच्याहु
तिंजुहुयादासन्यान्मामंत्रात्पाहिकस्याश्चिदभिशस्त्यैस्वाहेत्याहवनीयेवागग्रेगाअग्रएतुसरस्वत्यैवाचेस्वाहा ॥ वाचंदे
वींमनोनेत्रांविराजमुग्रांजैत्रीमुत्तमामेहभक्षां ॥ तामादित्यानावमिवारुहेमानुमतांपथिभिःपारयंतींस्वाहेतिद्वितीया
मातःसमानंब्रह्मणश्चप्राप्यहविर्धानैरराटीमभिमृशत्युर्वंतरिक्षंवीहीतिद्वार्येस्थूणेदेवीद्वारौमामासंतांसंलोकंमेलोककृ
तौकृणुतमितिंप्रपद्यांतरेणयुगधुराउपविश्यप्रेषितःप्रातरनुवाकमनुब्रूयान्मंद्रेणापोरेवतीःक्षयथाहिवस्वउपप्रयंतइतिसू
क्तेअवानोअग्नइतिषळग्निमीळेग्निंदूतंवसिष्वाहीतिसूक्तयोरुत्तमामुद्धरैत्त्वमग्नेव्रतपाइत्युत्तमामुद्धरैत्त्वंनोअग्नेमहोभिरि
तिनवेमेविप्रस्येतिसूक्तेयुक्ष्वाहिप्रेष्ठंवस्त्वमग्नेबृहद्वयइत्यष्टादशार्चंतस्त्वेतिसूक्तेअग्नेपावकदूतंवइतिसूक्तेअग्निर्होतानोअ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्वरइतितिस्रोऽग्निर्होताग्नइळेतिचतस्रःप्रवोवाजाउपसद्यायंत्वमग्नेयज्ञानामितितिस्र उत्तमाउद्धरेदग्नेहंस्यग्निंहिन्वंतुनः
प्राग्नयेवाचमितिसूक्तेइमांमेअग्नेसमिधमिमामितित्रयाणामुत्तमामुद्धरेदितिगायत्रैत्वमग्नेवसूंस्त्वंहिक्षैतवदग्नायोहोता
जनिष्टप्रवोदेवायाग्नेकदातइतिपंचसखायःसंवस्त्वामग्नेहविष्मंतइतिसूक्तेबृहद्भयइतिदशानांचतुर्थनवमेउद्धरेदुत्तमामु
त्तमांचादितस्रयाणामित्यानुष्टुभंमबोध्यग्निःसमिधेतिचत्वारिंप्राग्नयेबृहतेप्रवेधसेकवयेत्वंनोअग्नेवरुणस्यविद्वानित्येत
त्प्रभृतीनिचत्वार्यूर्ध्वऊषुणःससस्ययद्धियुतेतिपंचभद्रंतेअग्नइतिसूक्तैसोमस्यमातवसंप्रत्यग्निरुषसइतित्रीण्याहोतेतिद
शानांतृतीयाष्टमेउद्धरेद्दिवस्परीतिसूक्तयोःपूर्वस्योत्तमामुद्धरेत्त्वंह्यग्नेप्रथमइतिषण्णांद्वितीयमुद्धरेत्पुरोवोमंद्रमितिच
त्वारिंतंसुप्रतीकमितिषड्वेवःसुद्योत्मानंनिहोताहोतृषदनइतिसूक्तैत्रिमूर्धानमितित्रीणिवह्नियशसमुपप्रजिन्वन्निति
त्रीणिकातउपेतिरितिसूक्तैहिरण्यकेशइतितिस्रोपश्यमस्यमहतइतिसूक्तैद्वेविरूपेइतिसूक्तैअग्नेनयाग्रेबृहन्नित्यष्टानामु
त्तमादुत्तमास्तिस्रउद्धरेत्त्वमग्नेसुहवोरण्वसंदृगितिपंचाग्निंवोदेवमितिदशानांतृतीयचतुर्थेउद्धरेदितित्रैष्टुभंमेनावोअ
ग्निंप्रवोयह्वंमग्नेविवस्वत्सखायस्त्वायमग्निरग्नआयाह्यच्छानःशीरशोचिषमितिषळदर्शिगातुवित्तमइतिसप्तेतिबार्हतंमग्ने
वाजस्येतितिस्रःपुरुत्वात्वामग्नईळिष्वाहीत्यौष्णिहंजनस्यगोपास्त्वामग्नऋतायवइममूषुवोअतिथिमुषर्बुधमितिनवत्व
मग्नेद्युभिरितिसूक्तैत्वमग्नेप्रथमोअंगिरानूचित्सहोजाअमृतोनितुंदतइतिपंचवेदिषदइतिषण्णांतृतीयमुद्धरेदिमंस्तोमम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्हतैसंजागृवद्भिश्चित्रइच्छिशोर्वसुंनचित्रमहसमितिजागतंमग्निंतंमन्यइतंपांक्तमंत्याग्नेयःक्रतुः ॥ १३ ॥ अथोषस्यः
प्रतिष्यासूनरींकस्तउषइतितिस्रइतिगायत्रंमुषोभद्रेभिरित्यानुष्टुभंमिदंश्रेष्ठंपृथूरथइतिसूक्तैंप्रत्यर्चिरित्यष्टौद्युतद्यामान
मुषोवाजेनैंदमुत्यदुदुश्रियइतिसूक्तैंव्युषाआवोदिविजाइतिषळितित्रैष्टुभंप्रत्युअदर्शिसहवामेनेतिबार्हतंमुषस्तच्चित्रमा
भरेतितिस्रऔष्णिहमेताउत्याइतिचतस्रोजागतंमहेनोअद्येतिपांक्तमित्युषस्यःक्रतुः ॥ १४ ॥ अथाश्विनएषोउषाः
प्रातर्युजेतिचतस्रोश्विनायज्वरीरिषंआश्विनावश्वावत्यागोमदूषुनासत्येतितृचंदूरादिहेवेतितिस्रउत्तमाउद्धरेद्वाहिष्ठो
वांहयानामितिचतस्रउदीराथामामेहवमितिगायत्रंयदद्यस्थइतिसूक्तैंआनोविश्वाभिस्त्यंचिदत्रिमित्यानुष्टुभंमाभात्य
ग्निरितिसूक्तैंग्रावाणेवनासत्याभ्यामितित्रीणिधेनुःप्रत्नस्यकउश्रवदितिसूक्तैंस्तुषेमरेतिसूक्तैंयुवोरजांसीतिपंचानांतृती
यमुद्धरैत्प्रतिवांरथमितिसप्तानांद्वितीयमुद्धरेदितित्रैष्टुभंमिमाउवामयंवामोत्यमह्वआरथमितिसप्तद्युम्नीवांयत्स्थइति
बार्हतंमश्विनावर्तिरस्मदाश्विनावेहगच्छतमितितृचौयुवोरुषूरथंहुवइतिपंचदशेत्यौष्णिहंमबोध्यग्निर्ज्मएषस्यभानुरा
वांरथमभूदिदंयोवांपरिज्मेतित्रीणित्रिश्चिन्नोअद्येळेद्यावापृथिवीइतिजागतंप्रतिप्रियतममितिपांक्तमित्येतेषांच्छंदसां
पृथक्सूक्तानिप्रातरनुवाकःशतप्रभृत्यपरिमितोनान्यैराग्नेयंगायत्रमत्यावपेद्ब्राह्मणस्यनत्रैष्टुभंराजन्यस्यनजागतंवैश्य
स्याध्यासवदेकपदद्विपदायथास्थानंध्रुवाणिमांगलान्यंगन्ममहातारिष्मेळेद्यावापृथिवीइतिसंजागृवद्भिरितिचयःप्रेष्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्त्स्वर्गकामईळेद्यावीयमावर्तयेदातमसोपघातात्कालउत्तमयोत्सृप्यासनान्मध्यमस्थानेनप्रतिप्रियतममित्युपसंतनुयात्पुनरुत्सृप्योत्तमयोत्तमस्थानेनपरिदध्यादंतरेणद्वार्येस्थूणेअनभ्याहतमाश्रावयन्निवाश्रावयन्निव ॥ १५ ॥ इत्याश्वलायनश्रौतसूत्रेपूर्वषट्केचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ॥ ॥ ॥

हरिः ॐ ॥ ॥ परिहितेपइष्यहोतरित्युक्तोनभिहिंकृत्यापोनप्त्रीयाअन्वाहैषच्छनैस्तरांपरिधानीयायास्तासांनिगदादिशनैस्तरांताभ्यश्चाप्रसर्पणात्परंमंद्रेणप्रातःसवनंचाध्यर्धकारंप्रथमामृगावानमुत्तरावृष्टिकामस्यप्रकृत्यावाप्रकृतिभावेपूर्वेष्वासामर्धर्चेषुलिंगानिकांक्षेत्प्रदेवत्राब्रह्मणेगातुरेत्वितिनवहिनोतानोअध्वरंदेवयज्येतिदशमीमावर्वृततीरधनुद्विधाराइत्यावृत्तास्वेकधनासुप्रतियदापोअद्दश्रमायतीरितिप्रतिदृश्यमानास्वाधेनवःपयसातूर्ण्यर्थाःसमन्यायंत्युपयंत्यन्याइतितीर्थदेशेहोतृचमसेपांपूर्यमाणआपोनदेवीरुपयंतिहोत्रियमितिसमाप्यप्रणवेनोपरमेदागतमध्वर्युमवेरपोध्वर्याइउइतिपृच्छत्युतेमनंनमुरितिप्रत्युक्तोनिगदंब्रुवन्प्रतिनिष्क्रामेत्तास्वध्वर्योइंद्रायसोमंसोतामधुमंतं । वृष्टिवनिंतीव्रांतंबहुरमध्यैवसुमतेरुद्रवतआदित्यवतऋभुमतेविभुमतेवाजवतेबृहस्पतिवतेविश्वदेव्यावतइत्यंतमनवानमुक्त्वोदगासांपथोवतिष्ठेतोपातीतास्वन्वावर्ततयस्येंद्रःपीत्वावृत्राणिजंघनत्प्रसजन्यानितारिषोइमंबयोयंत्यध्वभिरितितिस्रउत्तमयानुप्रपद्येतेमाअग्मन्नेवतीर्जीवधन्याइतिद्वैसन्नासूत्तरयापरिधायोत्तरांद्वार्यामासाद्यराजानमभिमुखउप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विशेदनिरस्यतृणं ॥ १ ॥ उपांशुहूयमानैप्राणंयच्छस्वाहात्वासुहवसूर्यायप्राणप्राणंमेयच्छेत्यनुमंत्र्यउः इत्यनुप्राण्यादंत
र्याममपानंयच्छस्वाहात्वासुहवसूर्यायापानापानंमेयच्छेत्यनुमंत्र्यऊँ इतिचाभ्यपान्यादुपांशुसवनंग्रावाणैव्यानायत्वेत्य
भिमृश्यवाचंविसृजेतपवमानायसर्पणेन्वक्छंदोगान्मैत्रावरुणोब्रह्माचनित्यौतावंतरेणेतरेदीक्षिताश्चैद्रप्सश्चस्कंदेति
द्वाभ्यांविप्रुड्होमौहुत्वाध्वर्युमुखाःसमन्वारब्धाःसर्पत्यातीर्थदेशात्तत्स्तोत्रायोपविशंत्युद्गातारमभिमुखास्तान्होतानुमंत्र
यतेत्रैवासीनोयोदेवानामिहसोमपीथोयज्ञेबर्हिषिवेद्यांतस्यापिभक्षयामसिमुखमसिमुखमसिमुखंभूयासमितिदीक्षितश्चै
द्रजैत्स्तोत्रोपस्वारायसर्पेच्चोत्तरयोःसवनयोर्ब्रह्मन्स्तोष्यामःप्रशास्तरितिस्तोत्रायातिसर्जितावतिसृजतोभूरिंद्रवंतःसवि
तृप्रसूताइतिजपित्वोंस्तुध्वमितिब्रह्माप्रातःसवनेभुवइतिमाध्यंदिनेस्वरितितृतीयसवनेभूर्भुवःस्वरिंद्रवंतःसवितृप्रसू
ताइत्यूर्ध्वमाग्निमारुतांस्तुतदेवेनसवित्राप्रसूतांऋतंचसत्यंचवदंत ॥ आयुष्मत्यऋचोमागातंतनूपात्साम्नओ३मिति
जपित्वामैत्रावरुणःस्तुध्वमित्युच्चैः ॥ २ ॥ अथसवनीयेनपशुनाचरंतियद्देवतोभवत्याग्नेयोग्निष्टोमऐंद्राग्नउक्थ्येद्वि
तीयऐंद्रोवृष्णिःषोळशिनितृतीयःसारस्वतीमेष्यतिरात्रेचतुर्थीतिक्रतुपशवःपरिव्ययणाद्युक्तंमग्नीषोमीयेणाचात्वाल
मार्जनाद्दंडप्रदानवर्जंमुपविश्याभिहिंकृत्यपरिव्ययणीयांत्रिरावहदेवान्त्सुन्वतेयजमानायेत्यावाहनादिसुन्वच्छब्दोग्रे
यजमानशब्दादैष्टिकेषुनिगमेषुनात्याद्धारियोजनाद्दूर्ध्वंनप्रावित्रंसाधुतैयजमानदेवताओमन्वतीतेस्मिन्यज्ञैयजमाने

॥ २९ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिचप्रागाज्यपेभ्यः सवनदेवताआवाहयेदिंद्रंवसुमंतमावहेंद्रंरुद्रवंतमावहेंद्रमादित्यवंतमृभुमंतंविभुमंतंवाजवंतंबृह
स्पतिवंतंविश्वदेव्यावंतमावहेतिताः सूक्तवाकएवानुवर्तयेत्प्रवृताहुतीर्जुह्वतिवषट्कर्तारोन्येच्छावाकाच्चात्वालेमार्जयि
त्वाध्वर्युपथउपतिष्ठंतआदित्यप्रभृतीन्धिष्ण्यामादित्यमग्रेध्वनामध्वपतेश्रेष्ठःस्वस्त्यस्याध्वनःपारमशीयेतियूपादित्या
हवनीयनिर्मथ्यानग्नयःसगराःसगराअग्नयःसगरास्थसगरेणनाम्ना ॥ पातमाग्नयःपिपृतमाग्नयोनमोवोअस्तुमामाहिंसि
ष्टेतिसव्यावृतःशामित्रोवध्यगोहंत्वात्वालोत्करास्तावानेवमेवंदक्षिणावृतआग्नीध्रीयमच्छावाकस्यवादंदक्षिणंमार्जालीयं
खरमित्युत्तरेणाग्नीध्रीयंपरिव्रज्यंप्राप्यसदोभिमृशंत्युर्वंतरिक्षंवीहीतिद्वार्येसंमृश्यैवमपरानुपतिष्ठंतउपस्थितांश्चानुपस्थि
तांश्चाप्यपश्यंतोव्यनीक्षमाणाहोतामैत्रावरुणोब्राह्मणाच्छंसींपोतानेष्टेतिपूर्वयाद्वारासदःप्रसर्पंत्युरुंनोलोकमनुनेषिवि
द्वानितिजपंतउत्तरेणसर्वान्धिष्ण्यान्त्संनात्संनानपरेणयथास्वंधिष्ण्यानांपश्चादुपविश्यजपंतियोअद्यसौम्योवधोघायू
नामुदीरति ॥ विषूकुहमिवधन्वनाव्यस्याःपरिपंथिनंसदसस्पतयेनमइत्येवमपरयाब्रह्माप्रसृप्यदक्षिणपुरस्तान्मैत्राव
रुणस्योपविशेत्तमन्वंचऋत्विजःप्रसर्पकाःपूर्वेणौदुंबरीमपरेणधिष्ण्यान्यथांतरंमनूपविशंत्येतयावृताग्नीध्रंआग्नीध्रीयम
प्याकाशंदक्षिणादयोधिष्ण्याउदक्संस्थाःप्रसर्पिणामाद्यौतुविपरीतौतेषांविसंस्थितसंचरायथास्वंधिष्ण्यानुत्तरेणदक्षि
णमधिष्ण्यानां ॥ ३ ॥ अथैंद्रैःपुरोळाशैरनुसवनंचरंतिधानावंतंकरंभिणमितिप्रातःसवनेनुवाक्यामाध्यंदिनस्यसवन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यधानाइतिमाध्यंदिनेतृतीयेधानाःसवनेपुरुष्टुतेतितृतीयसवनेहोतायक्षदिंद्रंहरिवाँऽइंद्रोधानाअत्त्वितिप्रैषोलिंगैरनु
सवनमुद्धृत्यादेशपदंतेनैवेज्याहोतायक्षदसौयजयोस्तुस्थानंआगूर्वषट्कारौयत्रक्वचप्रैषेणयजेदथस्विष्टकृतोग्नेजुषस्व
नोहविर्माध्यंदिनेसवनेजातवेदोग्नेतृतीयेसवनेहिकानिषइत्यनुसवनमनुवाक्याहोतायक्षदग्निंपुरोळाशानामितिप्रैषोह
विरग्नेवीहीतियाज्यैतास्वनुवाक्यासुपुरोळाशशब्दंबहुवदेकेविज्ञायतेपूयतिवाएतद्दचोक्षरंयदेनदूहतितस्माद्दचंनोहेत्
॥ ४ ॥ द्विदेवत्यैश्चरंतिवायवइंद्रवायुभ्यांवायवायाहिदर्शतेंद्रवायूइमेसुताइत्यनुवाक्येअनवानंपृथक्प्रणवैहोतायक्ष
द्वायुमग्रेगाँहोतायक्षदिंद्रवायूअर्हतेतिप्रैषावनवानंमग्रंपिबामधूनामितियाज्येअनवानमेकागुरेपृथग्वषट्कारेइदमाद्य
नवानंप्रातःसवनइज्यानुवाक्येप्रैषौचोत्तरयोर्ग्रहयोर्हुत्वैतद्ग्रहपात्रमाहरत्यध्वर्युस्तद्गृह्णीयादेतुवसुःपुरूवसुरितिप्रतिगृह्य
दक्षिणमूरुमपोच्छाद्यतस्मिन्त्सादयित्वाकाशवतीभिरंगुलीभिरपिदध्यादेवमुत्तरेसव्येनत्वपिधार्यतयोःप्रतिग्रहोभक्ष
णंचमैत्रावरुणस्यायंवांमित्रावरुणाहोतायक्षन्मित्रावरुणागृणानाजमदग्निनेत्यैतुवसुर्विदद्वसुरितिप्रतिगृह्यदक्षिणेनैंद्र
वायवंहृत्वाभ्यात्मंसादनमाश्विनस्यप्रातर्युजाविबोधयहोतायक्षदश्विनानासत्यावावृधानाशुभस्पतीइत्यैतुवसुःसंयद्व
सुरितिप्रतिगृह्यैवमेवहृत्वोत्तरेणशिरःपरिहृत्याभ्यात्मतरंसादनंमनुवचनप्रैषयाज्यासुनित्योध्वर्युतःसंप्रैषउन्नीयमाने
भ्योन्वाहात्वावहंत्वसाविदेवंमिहोपयातेत्यनुसवनेहोतायक्षदिंद्रंप्रातःप्रातःसावस्यहोतायक्षदिंद्रंमाध्यंदिनस्यसवनस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

होतायक्षदिंद्रंतृतीयस्यसवनस्येतिंप्रेषितःप्रेषितोहोतानुसवनंप्रस्थितयाज्याभिर्यजतिंनामादेशमितरैंप्रशास्ताब्राह्मणा
च्छंसींपोतानेष्टाग्नीध्रोच्छावाकश्चोत्तरयोःसवनयोंःपुराग्नीध्रादिदंतेसोम्यंमधुंमित्रंवयंहवामहंइंद्रत्वावृषभंवयंमरुतोय
स्यहिक्षयैंग्नेपत्नीरिहावहोंक्षान्नायवशान्नायेतिंप्रातःसवनिक्यःप्रस्थितयाज्यांःपिबासोममभियमुग्रतर्दइतितिस्रोंर्वाङे
हिसोमकामंत्वाहुंस्तवायंसोमस्त्वमेह्यर्वांङिंद्रायसोमाःप्रदिवोविदानांऽआपूर्णोंअस्यकलशस्वाहेतिमाध्यंदिन्यंइंद्रऋभु
भिर्वाजवद्भिःसमुक्षितंमिंद्रावरुणासुतपाविमंसुतंमिंद्रश्चसोमंपिबतंबृहस्पतंआवोवहंतुसप्तयोरघुष्यदोंमेवनःसुहवाऽ
आहिगंतनेंद्राविष्णूपिबतंमध्वोअस्यैंमंस्तोममर्हतेजातवेदसइतितातींयसवनिक्यंःसोमस्याग्नेवीहीत्यनुवषट्कारंःप्रस्थि
तयाज्यासुशस्त्रयाज्यासुंमरुत्वतीयेहारियोजनेंमहिम्न्याश्विनेचतैरोअन्ह्योंतदेषाभियज्ञगाथागीयते । ऋतुयाजान्द्वि
देवत्यांन्यश्चपात्नीवतोग्रहः । आदित्यग्रहसावित्रौंतान्त्समानुवषट्कृथाइतिंप्रतिवषट्कारंभक्षणंतूष्णीमुत्तरमेत्यध्व
युंरयाळग्नीदितिपृच्छंत्ययाळितिप्रत्याहंसभद्रमकर्योनःसोमस्यपाययिष्यतीतिहोताजपति ॥ ५ ॥ ऐंद्रवायवमुत्तरेर्धे
गृहीत्वांध्वर्यवेप्रणामयैंदेषवसुःपुरूवसुंरिहवसुःपुरूवसुंर्मयिवसुःपुरूवसुंर्वाक्पावाचंमेपाह्युपहूतावाक्सहप्राणेनोपमां
वाक्सहप्राणेनह्वयतांमुपहूताऋषयोदैव्यासंस्तनूपावानस्तन्वस्तपोजांउपमामृषयोदैव्यासोह्वयंतौंतनूपावानस्तन्वस्त
पोजाइंत्यध्वर्यउपह्वयस्वेत्युक्त्वांवघ्रायनासिकाभ्यांवाग्देवीसोमस्यतृप्यत्वितिभक्षयैंत्सर्वत्रप्रतिभक्षितंहोतृचमसेंकिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चिदवनीयानाचम्योपह्वानादिपुनःसंभक्षयित्वानसोमेनोच्छिष्टाभवंतीत्युदाहरंतिशेषंहोतृचमसआनीयोत्सृजेदेवमु
त्तरेनत्वेनयोःपुनर्भक्षोनकंचनद्विदेवत्यानामनवनीतमवसृजेन्मैत्रावरुणमेषवसुर्विंदद्वसुरिहवसुर्विंदद्वसुर्मयिवसुर्विंद
द्वसुश्चक्षुष्पाश्चक्षुर्मेपाह्युपहूतंचक्षुःसहमनसोपमांचक्षुःसहमनसाह्वयतामुपहूताऋषयोदैव्यासस्तनूपावानस्तन्वस्तपोजा
उपमामृषयोदैव्यासोह्वयंतांतनूपावानस्तन्वस्तपोजाइत्यक्षीभ्यांत्विहावेक्षणेदक्षिणेनाग्रेसव्येनपाणिनाहोतृचमसमाद
दीतैतुवसूनांपतिर्विश्वेषांदेवानांसमिदितिस्यारब्धिनांतस्योरोर्वसनमपोच्छाद्यतस्मिन्त्सादयित्वाकाशवतीभिरंगुली
भिरपिदध्यादाश्विनंयथाहृतंपरिहृत्यपुनःसादयित्वाध्वर्यवेप्रणामयेदेषवसुःसंयद्वसुरिहवसुःसंयद्वसुर्मयिवसुःसंयद्व
सुःश्रोत्रपाःश्रोत्रंमेपाह्युपहूतंश्रोत्रेसहात्मनोपमांश्रोत्रेसहात्मनाह्वयतामुपहूताऋषयोदैव्यासस्तनूपावानस्तन्वस्तपोजा
उपमामृषयोदैव्यासोह्वयंतांतनूपावानस्तन्वस्तपोजाइतिकर्णाभ्यांत्विहोपोद्यच्छेद्दक्षिणायाग्रेनिधायहोतृचमसंस्पृष्ट्वोद
कंमिळामुपह्वयतउपोद्यच्छंतिचमसानवांतरेळांप्राश्याचम्यहोतृचमसंभक्षयेदध्वर्यउपह्वयस्वेत्युक्त्वादीक्षितोदीक्षिता
उपह्वयध्वंयजमानाइतिवामुख्यान्वापृथग्घोत्रकाउपह्वयध्वमितीतरानेवमितरेयथासभक्षंत्वदीक्षितामुख्यचमसादच
मसाद्द्रोणकलशाद्वोक्तःसोमभक्षजपःसर्वत्रहोतुर्वषट्कारेचमसाह्वयंतउद्गातुर्ब्रह्मणोयजमानस्यतेषांहोताग्रेभक्षयेदिति
गौतमोभक्षस्यवषट्कारान्वयत्वादभक्षणमितरेषामितितौल्वलिःकृतार्थत्वाद्भक्षयेयुरितिगाणगारिरतःसंस्कारत्वात्का

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चतच्चमसतास्यान्नचान्यःसंबंधोभक्षयित्वापामसोममममृताअभूमशंनोभवहृदआपीतइंदवितिंमुखहृदयेअभिमृशेरन्ना
प्यायस्वसमेतुतेसंतेपयांसिसमुयंतुवाजाइतिंचमसानाद्योपाद्यान्पूर्वयोःसवनयोराद्यांस्तृतीयसवनेसर्वत्रात्मानमन्यत्रै
कपात्रेभ्यआप्यायितांश्चमसान्त्सादयंतितेनाराशंसाभवंति ॥ ६ ॥ एतस्मिन्कालेप्रपद्याच्छावाकउत्तरेणाग्नीध्रीयं
परिव्रज्यपूर्वेणसदआत्मनोधिष्ण्यदेशउपविशेत्पुरोळाशहृगळंप्रत्तमिळामिवोद्यम्याच्छावाकवदस्वेत्युक्तोच्छावोअग्नि
मवसइतितृचमन्वाहात्येनप्रणवेनोपसंतनुयाद्यजमानहोतरध्वर्योग्नींद्रह्मन्पोतर्नेष्टरुतोपवक्तरिषेषयध्वमूर्जोर्जयध्वंनि
वोजामयोजिहतान्यजामयोनिःसपत्नायामनिबाधितासोजयताभीत्वरीजयताभीत्वर्याःश्रवद्वइंद्रःशृणवद्वोअग्निःप्र
स्थायेंद्राग्निभ्यांसोमंवोचतोपोअस्मान्ब्राह्मणान्ब्राह्मणाह्वयध्वमितिसमाप्तेस्मिन्निगदेध्वर्युर्होतर्युपहवंकांक्षतेप्रत्येतासु
न्वन्यजमानःसूक्तावाममग्रभींदुतप्रतिष्ठोतोपवक्तरुतनोगावउपहूताउपहूतइत्युपह्वयतउपहूतःप्रत्यस्माइत्युन्नीयमाना
यानूच्यप्रातर्यावभिरागतमितियजतिंनिधायपुरोळाशहृगळंस्पृष्ट्वोदकंचमसंभक्षयेन्नास्पृष्ट्वोदकाःसोमेनेतराणिहवीं
ष्यालभेरन्नादायैनदादित्यप्रभृतीन्धिष्ण्यानुपस्थायापरयाद्वारासदःप्रसृप्यपश्चात्स्वस्यधिष्ण्यस्योपविश्यप्राश्नीयादुप
विष्टेब्रह्माग्नीध्रीयंप्राप्यहविरुच्छिष्टंसर्वेप्राश्नीयुःप्रागेवेतरेगताभवंतिप्राश्यप्रतिप्रसृप्य ॥ ७ ॥ ऋतुयाजैश्चरंतिते
षांप्रैषाःपंचमंप्रैषसूक्तंतेनतेनैवप्रेषितःप्रेषितःससयथाप्रैषंयजतिंहोताध्वर्युगृहपतिभ्याहोतरेतद्यजेत्युक्तःस्वयंषष्ठेपृष्ठ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्ट्याहनिपश्चादुत्तरवेदेरुपविश्याध्वर्युःपश्चाद्गार्हपत्यस्यगृहपतिरथैतद्दतुपात्रमानंतर्येणवषट्कर्तारोभक्षयंतिपृथगध्वर्युः
प्रतिभक्षयेत्तस्मिंश्चैवोपहवः ॥ ८ ॥ पराङध्वर्यावावृत्तेसुमत्पद्वग्देपितामातरिश्वाच्छिद्रापदाधादच्छिद्रोक्थाकवयः
शंसन्त्सोमोविश्वविन्नीथानिनेषद्बृहस्पतिरुक्थामदानिशंसिषद्वागायुर्विश्वायुर्विश्वमायुःकइदंशंसिष्यतिसइदंशंसिष्य
तीतिजपित्वानभिहिंकृत्यशोंसावोमित्युच्चैराहूयतूष्णींशंसंशंसेदुपांशुसप्रणवंमसंतन्वन्नेषआहावंःप्रातःसवनेशस्त्रादिषु
पर्यायप्रभृतीनांचसर्वत्रचांतःशस्त्रंतेनचोपसंतानःशस्त्रस्वरःप्रतिगरंओथामोदैवोतिशोंसामोदैवेत्याहावेप्लुतादिःप्रणवे
प्लुतादिरवसानेप्रणवेप्रणवआहावोत्तरेवसानेचप्रणवांतोवायत्रयत्रचांतःशस्त्रंप्रणवेनावस्यतिप्रणवांतएवतत्रप्रतिगरंः
शस्त्रांतेतुप्रणवोंभूरग्निर्ज्योतिर्ज्योतिरग्नो३मूइंद्रोज्योतिर्भुवोज्योतिरिंद्रो३मूसूर्योज्योतिर्ज्योतिःस्वःसूर्यो३मितित्रिपद
स्तूष्णींशंसोयद्युवैषट्पदंःपूर्वैर्ज्योतिःशब्दैरग्रेवस्यैदुच्चैर्निविदंयथानिशांतमग्निर्देवेद्धइतिनास्याआह्वानंनचोपसंतानउ
त्तमेनपदेनप्रवोदेवायेत्याज्यमुपसंतनुयादेतेननिविदउत्तराःसर्वेचपदसमाम्नायाउपसंतानस्त्वन्यत्राह्वानंचनिविदामा
ज्याद्यांत्रिःशंसैदर्धर्चशोविग्राहैतन्निदर्शयिष्यामः ॥ प्रवोदेवायाग्नयेबर्हिष्ठमर्चास्मै ॥ गर्महेवेभिरासनोयजिष्ठोबर्हि
रासदो३मित्यृगावानंवैवमेवैतेनाद्याःप्रतिपदामनृगावानमनुब्राह्मणंवानुपूर्व्यमाहूयोत्तमयापरिदधातिसर्वशस्त्रपरि
धानीयास्वेवमुक्थंवाचिघोषायत्वेतिशस्त्वाजपेदग्नइंद्रश्चदाशुषोदुरोणइतियाज्योक्थपात्रमग्रेभक्षयेत्ततश्चमसांश्चमसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नः सर्वशस्त्रयाज्यांतेषुवषट्कर्तैकपात्राण्यादित्यग्रहसावित्रवर्जं ॥ ९ ॥ स्तोत्रमग्नेशस्त्रादेषेतिप्रोक्तउद्गातुर्हिंकारेप्रा
तःसवनआह्वयीरन्प्रतिहारउत्तरयोःसवनयोर्वायुरग्रेगायज्ञप्रीरितिसप्तानांपुरोरुचौतस्यास्तस्याउपरिष्टात्तृचंतृचंशं
सेद्वायवायाहिदर्शतेतिसप्ततृचाद्द्वितीयांप्रउगेत्रिःपुरोरुग्भ्यआह्वयीतषष्ठ्यांत्रिरवस्यैदर्धचैर्धर्चउत्तमांनशंसेच्छंसंत्येके
तृचआह्वानमशंसनेमाधुच्छंदसंप्रउगमित्येतदाचक्षतउक्थंवाचिश्लोकायत्वेतिशस्त्वाजपेद्विश्वेभिःसोम्यंमध्वितिया
ज्याप्रशास्ताब्राह्मणाच्छंस्यच्छावाकइतिशस्त्रिणोहोत्रकास्तेषांचतुराहावानिशस्त्राणिप्रातःसवनेतृतीयसवनेपर्यायेष्वति
रिक्तेषुचपंचाहावानिमाध्यंदिनेस्तोत्रियानुरूपेभ्यःप्रतिपदनुचरेभ्यःप्रगाथेभ्योधाय्याभ्यइतिपृथगाह्वानंहोतुरपितेभ्य
श्चान्यदनंतरमादौनिविद्धानीयानांसूक्तानामनेकंचेत्प्रथमेष्वाहावआपोदेवतेचतृचैतेषांतृचास्तोत्रियानुरूपाःशस्त्रादि
षुसर्वत्रमाध्यंदिनेप्रगाथास्तृतीयायथाग्रहणमन्यद्याज्यांतानिशस्त्राण्युक्थंवाचीत्येषांशस्त्वाजपःप्रातःसवनऊर्ध्वंचषो
ळशिनःसर्वेषामुक्थंवाचींद्रायेतिमाध्यंदिनउक्थंवाचींद्रायदेवेभ्यइत्युक्थेषुसषोळशिकेष्वनंतरस्यपूर्वेणस्तोत्रियेणानु
रूपस्यछंदःप्रमाणलिंगदैवतान्यार्षचैकंआनोमित्रावरुणानोगंतंरिशादसाप्रवोमित्रायप्रमित्रयोर्वरुणयोरितिनवायातं
मित्रावरुणेतियाज्यायाहिसुषुमाहितइतिषट्स्तोत्रियानुरूपावनंतराःसप्तैंद्रत्वावृषभमुद्धेदभीतितिस्रइंद्रक्रतुविदंसुत
मितियाज्यैंद्राग्नीआगतंसुतमिंद्राग्नीअपसस्परि । तोशावृत्रहणाहुवइतितिस्रइहेंद्राग्नीउपेयंवामस्यमन्मनइतिनवैंद्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्नीआगतंसुतमितियाज्या ॥ १० ॥ संस्थितेषुसवनेषुषोळशिनिचातिरात्रेप्रशास्तःप्रसुहीत्युक्तःसर्पतेतिप्रशास्तातिसृजेद्धोतादक्षिणेनौदुंबरीमंजसैतरेपरयाद्वारौत्तरांवेदिःश्रोणीमभिनिःसर्पतिंमृगतीर्थमित्येतदाचक्षतएतेननिष्क्रम्ययथार्थनत्वेवान्यन्मूत्रेभ्यएतेननिष्क्रम्यकृत्वोदकार्थंवेद्यांसमस्तानुपस्थायापरयाद्वारानित्ययावृतासदोद्वार्येचाभिमृश्यतूष्णींप्रतिप्रसर्पेत्येषावृत्सर्पतेतिवचनैपूर्वयैवगृहपतिः ॥ ११ ॥ एतस्मिन्कालेग्रावस्तुत्प्रपद्यतेतस्योक्तमुपस्थानैपूर्वयाद्वाराहविर्धानेप्रपद्यदक्षिणस्यहविर्धानस्यप्रागुदगुत्तरस्याक्षशिरसस्तृणंनिरस्यराजानमभिमुखोवतिष्ठतेनात्रोपवेशनोयोअद्यसौम्यइतित्वथास्माअध्वर्युरुष्णीषंप्रयच्छतितंतदंजलिनाप्रतिगृह्यत्रिःप्रदक्षिणंशिरःसमुखंवेष्टयित्वायदासोमांशूनभिषवायव्यपोहैत्यथग्राव्णोभिष्टुयान्मध्यमस्वरेणेदंसवनमभित्वादेवसवितर्युजतेमनउतयुंजतेधियआतूनइंद्रक्षुमंतैमाचिदन्यद्विशंतप्रैतेवदंत्वित्यर्बुदंप्रागुत्तमायाआवक्रंजसेग्रवोग्रावाणइतिसूक्तयोरंतरोपरिष्टात्पुरस्ताद्वापावमानीरोप्यंयथार्थमावाग्रहग्रहणाच्छिष्टयापरिधार्यवेद्यंयजमानस्योष्णीषमादार्यंयथार्थमंत्येष्वहःसुप्रतिप्रयच्छैदितरेष्वथापरमभिरूपंकुर्यादितिगाणगारिराप्यायस्वसमेतुतइतितिस्रोमृजंतित्वादशक्षिपएतमुत्यंदशक्षिपोमृज्यमानःसुहस्त्यादशभिर्विवस्वतोदुहंतिसप्तैकामधुक्षत्पिप्युषीमिषमाकलशेषुधावतिपवित्रेपरिषिच्यतइत्येकाकलशेषुधावतिश्येनोवर्मविगाहतइतिद्वैएतासामर्बुदस्यचतुर्थींमुद्धृत्यतृचांतेषुतृचानवदध्यादाप्याय्यमानेप्रथमैमृज्यमानेद्वितीयैदुह्यमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेतृतीयंमासिच्यमानेचतुर्थेबृहच्छब्देबृहच्छब्देचतुर्थीमाचिदन्यद्विशंसतेतियदिग्रावाणःसंहादेरन्त्समानमन्यदर्बुद
मेवेत्येकैप्रवोग्रावाणइत्येकउक्तंसर्पणंस्तुतेमाध्यंदिनेपवमानेविहृत्यांगारान् ॥ १२ ॥ दधिघर्मेणचरंतिप्रव
र्ग्यवांश्चैत्तस्योक्तमृगावानैघर्मेणेज्याभक्षिणश्चहोतर्वदस्वेत्युक्तउत्तिष्ठतावपश्यतेत्याहश्रातंहविरित्युक्तःश्रातंहविरित्य
न्वाहश्रातंमन्यऊधनिश्रातमग्नाविति यजत्यग्नेवीहीत्यनुवषट्कारोदधिघर्मस्याग्नेवीहीतिवा ॥ मयित्यदिंद्रियंबृहन्म
यिद्युम्नमुतक्रतुः ॥ त्रिश्रुद्धर्मोविभातुमआकूत्यामनसासहविराजाज्योतिषासह ॥ तस्यदोहमशीयतेतस्यतइंद्रपी
तस्यत्रिष्टुप्छंदसउपहूतस्योपहूतोभक्षयामीतिभक्षजपोयंधिष्ण्यवतांप्रांचमंगारैरभिविहरेयुःपश्चात्स्वस्यधिष्ण्यस्योपवि
श्योपहवमिष्ट्वापरित्वाग्नेपुरंवयमितिजपेदनिष्ट्वादीक्षितःसवनीयानांपुरस्तादुपरिष्टाद्वापशुपुरोळाशेनचरंत्यक्रियामेकै
न्यत्रतदर्थवादवदनात्क्रियामाश्मरथ्योन्विताप्रतिषेधात्पुरोळाशाद्युक्तमानाराशंससादनान्नत्विहद्विदेवत्याएतस्मि
न्कालेदक्षिणानीयंतेहीनैकाहेषुकृष्णाजिनानिधून्वंतःस्वयमेवदक्षिणापथंयंतिदीक्षिताःसत्रेष्विदमहंमांकल्याण्यैकीर्त्यै
तेजसेयशसेमृतत्वायात्मानंदक्षिणान्नयानीतिजपंतउन्नेष्यमाणास्वाग्नीध्रीयआहुतीर्जुह्वतिंददानीत्यग्निर्वदतिंवायुराह
तथेतितत् ॥ हंतेतिचंद्रमाःसत्यमादित्यःसत्यमोमापस्तत्सत्यमाभरन् ॥ दिशोयज्ञस्यदक्षिणादक्षिणानांप्रियोभूया
संस्वाहा ॥ प्राचिह्येधिप्राचिजुषाणाप्राच्याज्यस्यवेतुस्वाहेतिद्वितीयां ॥ कइदंकस्माअदात्कामःकामायादात्कामोदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताकामःप्रतिग्रहीतांकामंसमुद्रमाविशकामेनत्वाप्रतिगृह्णामिकामैतत्तेवृष्टिरसिद्यौस्त्वाददातुपृथिवीप्रतिगृह्णात्वित्य
तीतास्वनुमंत्रयेतप्राण्यभिमृशेदप्राणिकन्यांचसर्वत्रचैवंप्रतिगृह्याग्नीध्रीयंप्राप्यहविरुच्छिष्टंसर्वेप्राश्नीयुःप्राश्यप्रतिप्रसृ
प्य ॥ १३ ॥ मरुत्वतीयेनग्रहेणचरंतींद्रमरुत्वइहपाहिसोमंहोतायक्षदिंद्रंमरुत्वंतंसजोषाइंद्रसगणोमरुद्भिरितिभक्षयि
त्वैतत्पात्रैमरुत्वतीयंशस्त्रंशंसेदध्वर्योशोंसावोमितिमाध्यंदिनेशस्त्रादिष्वाहावंआत्वारथंयथोतयइंदवसोसुतमंधइतिं
मरुत्वतीयस्यप्रतिपदनुचरांविंद्रनेदीयएदिहीतींद्रनिहवःप्रगाथंःप्रनूनंब्रह्मणस्पतिरितिब्राह्मणस्पत्यस्तृचांःप्रतिपदनु
चराद्बृचाःप्रगाथांआतोर्धर्चसर्वस्तोत्रियानुरूपांःप्रतिपदनुचराःप्रगाथांःसर्वत्रप्राक्चछंदांसित्रैष्टुभात्सर्वाश्चैवाचतुष्प
दांःपंक्तिषुद्विरवस्येद्वयोर्द्वयोःपादयोरर्धर्चशोवाश्विनेपच्छःशस्यगतांतुपच्छःसमासमुत्तमेपदैपच्छोन्यत्पादैरवसायार्ध
र्चांतैःसंतानोग्निर्नेतात्वंसोमक्रतुभिःपिन्वंत्यपइतिधाय्यांःप्रवइंद्रायबृहतइतिमरुत्वतीयःप्रगाथोजनिष्ठाउग्रइत्येकभूय
सीःशस्त्वामरुत्वतीयांनिविदंदध्यात्सर्वत्रैवमयुजासुमाध्यंदिनएकांतृचेधायुग्मास्वेकांशिष्ट्वातृतीयसवनेक्षिणीमृजानः
परिदध्याध्यायन्नेनआत्मनोन्यत्राप्येतयापरिदधदेवंमुक्थंवाचींद्रायशृण्वतेत्वेतिशस्त्वाजपैद्येत्वाहिहत्येमघवन्नवर्ध
न्नितियाज्या ॥ १४ ॥ निष्केवल्यस्याभित्वाशूरनोनुमोभित्वापूर्वपीतयइतिप्रगाथौस्तोत्रियानुरूपौयदिरथंतरंपृष्ठंयद्यु
वैबृहत्त्वामिद्धिहवामहेत्वंह्यहिचेरवइतिप्रगाथाएतेभवंतितान्द्वेतिस्रस्कारंशंसेच्चतुर्थषष्ठौपादौबार्हतेप्रगाथेपुनरभ्यसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वोत्तरयोरवस्यैद्बृहतीकारंचेत्तावेवाद्वींस्तृतीयपंचमौतुकाकुभेषुप्रत्यादानाद्युत्तरैर्वमेतत्पृष्ठेष्वहःस्विंद्रनिहवब्राह्मणस्प
त्यान्बृहतीकारमितरेषुपृष्ठेषुबृहद्रथंतरयोश्चतृचस्थयौर्होत्रकाश्चयेषांप्रगाथास्तोत्रियानुरूपाःसर्वमन्यद्यथास्तुतंपरिमि
तशस्यएकाहःसयद्युभयसामायत्पवमानेतस्ययोनिरनुरूपौयोनिस्थानएवैनामन्यत्रशंसेदूर्ध्वधाय्यायायोनिस्थानमने
कानंतर्येसकृत्पृथग्वाह्वानमेवमूर्ध्वमिंद्रनिहवात्प्रगाथानाँयद्वावानेतिधाय्यापिबासुतस्यरसिनइतिसामप्रगाथइंद्रस्यनु
वीर्याणीत्येतस्मिन्नैंद्रींनिविदंदध्यादनुब्राह्मणंवास्वरउक्थंवार्चींद्रायोपश्रृण्वतेत्वेतिशस्त्वाजपेत्पिबासोमिंद्रमंदतुत्वे
तियाज्या ॥ १५ ॥ होत्रकाणांकयानश्चित्रआभुवत्कयात्वंनऊत्याकस्तमिंद्रत्वावसुंसद्योहजातएवात्वामिंद्रौशन्नुषुणः
सुमनाउपाकइतियाज्यातंवोदस्ममृतीषहँतत्त्वायामिसुवीर्यमितिप्रगाथौस्तोत्रियानुरूपाउदुत्येमधुमत्तमाइंद्रःपूर्भिदु
दुब्रह्माण्यृजीषीवज्रीवृषभस्तुराषाळितियाज्यातरोभिर्वोविदद्वसुंतरणिरित्सिषासतीतिप्रगाथौस्तोत्रियानुरूपाउदिन्व
स्यरिच्यतेभूयइदिमामूष्वित्युपोत्तमामुद्धरेत्सर्वत्रपिबावर्धस्वतवघासुतासइतियाज्या ॥ १६ ॥ अथतृतीयसवनंमु
त्तमस्वरेणादित्यग्रहेणचरंत्यादित्यानामवसानूतनेनहोतायक्षदादित्यान्प्रियान्प्रियधाम्नआदित्यासोअदितिर्मादयंता
मितिनैतंग्रहमीक्षेतहूयमानंस्तुतआर्भवेपवमानेविहृत्यांगारान्मनोतादिपश्विळांतंपशुकर्मकृत्वापुरोळाशाद्युक्तमाना
राशंससादनात्सन्नेषुत्रदिष्टात्पुरोळाशस्यतिस्रस्तिस्रःपिंड्योदक्षिणतःप्रतिस्वंचमसेभ्यःस्वेभ्यःपितृभ्यउपास्येयुरत्रपित

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रोमादयध्वैयथाभागमावृषायध्वमितिसव्यावृतआग्नीध्रीयंप्राप्यहविरुच्छिष्टंसर्वेप्राश्नीयुःप्राश्यप्रतिप्रसृप्य ॥ १७ ॥
सावित्रेणग्रहेणचरैत्यभूद्देवःसवितावंद्योनुनोहोतायक्षद्देवंसवितारंदमूनादेवःसवितावरेण्योदधद्रत्नादक्षपितृभ्यआयु
नि ॥ पिबात्सोममंममदन्नेनमिष्टयःपरिज्माचिद्रमतेअस्यधर्मणीतिवषट्कृतेहोतावैश्वदेवंशस्त्रंशंसेत्सर्वादिशोध्यायेच्छं
सिष्यन्यस्यांद्वेष्योनतामध्वर्योशोशोंसावोमितितृतीयसवनेशस्त्रादिष्वाहावस्तत्सवितुर्वृणीमहेद्यानोदेवसवितरितिवै
श्वदेवस्यप्रतिपदनुचरावभूद्देवएकयाचदशभिश्चस्वभूतेद्वाभ्यामिष्टयेविंशत्याचतिसृभिश्चवहसेत्रिंशताचनियुद्भिर्वाय
विहताविमुंचप्रद्यावेतिदैर्घतमसंसुरूपकृत्नुमूतयेतक्षन्रथमयंवेनश्चोदयत्पृश्निगर्भायेभ्योमातामधुमत्पिन्वतेपर्यएवापित्रे
विश्वदेवायवृष्णआनोभद्राःक्रतवोयंतुविश्वतइतिनववैश्वदेववैश्वदेवाग्निमारुतयोःसूक्तेषुसावित्रादिनिविदोदध्याच्च
तन्नोवैश्वदेवउत्तरास्तिस्रउत्तरेसूक्तानांतद्धिदैवतदैवतेनसूक्तांतोधाय्याश्चात्रैकपातिनीरदितिर्द्यौरदितिरंतरिक्षमितिप
रिदध्यात्सर्वत्रवैश्वदेवेद्विःपच्छोर्धर्चशःसकृद्भूमिमुपस्पृशन्नुक्थंवाचींद्रायदेवेभ्यआशुत्यैत्वेतिशस्त्वाजपेद्विश्वेदेवाः
शृणुतेमंहवंमइतियाज्या ॥ १८ ॥ त्वंसोमपितृभिःसंविदानइतिसौम्यस्ययाज्यांतंघृतयाज्याभ्यांमुपांशूभयतःप
रियजंतिंघृताहवनोघृतपृष्ठोअग्निर्घृतेश्रितोघृतम्वस्यधाम ॥ घृतप्रुषस्त्वाहरितोवहंतुघृतंपिबन्यजसिदेवदेवानितिपुर
स्तादुरुविष्णोविक्रमस्वोरुक्षयायनस्कृधि ॥ घृतंघृतयोनेपिबप्रप्रयज्ञपतिंतिरेत्युपरिष्टादन्यतरतश्चेदग्नाविष्णूमहि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धामप्रियंवामित्युपांश्वेवाहृतंसौम्यँपूर्वमुद्गातृभ्योगृहीत्वावेक्षेतयत्तेचक्षुर्दिवियत्सुपर्णेयेनैकराज्यमजयोहिना ॥ दीर्घं यच्चक्षुरदितेरनंतँसोमोनृचक्षामयितद्दधात्वित्यपश्यन्हृदिस्पृक्क्रतुस्पृग्वर्चोधावर्चोअस्मासुधेहि ॥ यन्मेमनोयमंगतँ यद्वामेअपरागतं ॥ राज्ञासोमेनतद्वयंमस्मासुधारयामसि ॥ भद्रंकर्णेभिःशृणुयामदेवाइतिचाँगुष्ठोपकनिष्ठिकाभ्यां माज्येनाक्षिणीअज्यंछंदोगेभ्यःप्रयच्छैद्विहृतेषुशालाकेष्वाग्नीध्रःपात्नीवतस्ययजत्यैभिरग्नेसरथंयाह्यर्वाङित्युपांश्वेवने ष्टारैविसंस्थितसंचरेणानुप्रपद्यतस्योपस्थउपविश्यभक्षयेत् ॥ १९ ॥ अथयथेतंस्वभ्यग्रमाग्निमारुतँतस्याद्यांपच्छऋगा वानैपच्छःशस्याचैदर्धर्चशइतरांसंतानंमुत्तमेनवचनेनवैश्वानरायपृथुपाजसेशंनःकरत्यर्वतेप्रत्वक्षसःप्रतवसेयज्ञायज्ञा वोअग्नयेदेवोवोद्रविणोदाइतिप्रगाथौस्तोत्रियानुरूपौप्रतव्यसींनव्यसींमापोहिष्ठेतितिस्रोवियतमपउपस्पृशन्नन्वारब्धे ष्वपावृतशिरस्कइदमादिप्रतिप्रतीकमाह्वानंमुतनोहिर्बुध्यःशृणोतुंदेवानांपत्नीरुशतीरवंतुनइतिद्वैराकामहमितिद्वैपा वीरवीकन्याचित्रायुरिमंयमप्रस्तरमाहिसीदंमतलीकव्यैर्यमोअंगिरोभिरुदीरतामवरउत्परासंआहंपितॄन्त्सुविदत्राँऽ अवित्सींदंपितृभ्योनमोअस्त्वद्यस्वादुष्किलायमितिचतस्रोमध्येचाह्वानैमदामोदैवमोदामोदैवोमित्यासांप्रतिगरौययो रोजसास्कभितारजांसिवीर्येभिर्वीरतमाशविष्ठा ॥ यापत्येतेअप्रतीतासहोभिर्विष्णूअगन्वरुणापूर्वहूतौ ॥ विष्णोर्नुकंवी र्याणिप्रवोचँतंतुतन्वन्नजसोभानुमन्विह्येवानइंद्रोमघवाविरप्शीतिपरिदध्याद्भूमिमुपस्पृशन्नुत्तमेनवचनेनध्रुवावनय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नंकांक्षेंदुक्थंवाचींद्रायदेवेभ्यंआश्रुतायत्वेतिशस्त्वाजपेंदग्नेमरुद्भिःशुभयद्भिर्ऋक्वभिरितियाज्येत्यंतोग्निष्टोमोग्निष्टोमः
॥ २० ॥ इत्याश्वलायनश्रौतसूत्रेपूर्वषट्केपंचमोऽध्यायः ॥ ५ ॥ ॥ ॥ ॥

॥ ॐम् ॥ उक्थ्येतुहोत्रकाणांमेह्यूषुब्रवाणितंआग्निरगामिभारतंश्चर्षणीधृतमस्तभ्नाद्द्यामसुरइतितृचांविंद्रावरु
णायुवमावांराजानांविंद्रावरुणामधुमत्तमस्येतियाज्यांवयमुत्वामपूर्व्ययोनइदमिदंपुरेतिंप्रगाथौसर्वाःककुभंःप्रमंहि
ष्ठायोदग्नुतोच्छामइंद्रंबृहस्पतेयुवमिंद्रश्चवस्वइतियाज्यांधाहींद्रगिर्वणइयंतइंद्रगिर्वणंऋतुर्जनित्रीनूमतींभवामित्रःसंवां
कर्मणेंद्राविष्णूमदपतीमदानामितियाज्येत्यंतउक्थ्यः ॥ १ ॥ अथषोळश्यसाविसोमइंद्रतइतिस्तोत्रियानुरूपावात्वा
वहंतुहरयइतितिस्रोगायत्र्यउपोषुश्रृणुहीगिरंःसुसंदृशंत्वावयंमघवन्नित्येकाद्वेचपंक्तीयदिंद्रपृतनाज्येऽयंतेअस्तुहर्यत
इत्यौष्णिहबार्हतौतृचावाधूर्ष्वस्माइतिद्विपदाब्रह्मन्वीरब्रह्मकृतिंजुषाणइतित्रिष्टुबेषब्रह्मायऋत्वियइंद्रोनामश्रुतोगृणे ।
विस्रुतयोयथापथेइंद्रत्वद्यंतिरातयः ॥ त्वामिच्छवसस्पतेयंतिगिरोनसंयतइतितिस्रोद्विपदाःप्रतेमहेविदथेशंसिषंहरी
इतितिस्रोजगत्यस्त्रिकद्रुकेषुमहिषोयवाशिरं ॥ प्रोष्वस्मैपुरोरथमितितृचावातिच्छंदसौपच्छःपूर्वद्वेधाकारमुत्तरमनुष्टु
ब्गायत्रीकारंप्रचेतनप्रचेतयायाहिपिबमत्स्व ॥ ऋतुश्छंदऋतंबृहत्सुम्नआधेहिनोवसवित्यनुष्टुप्प्रप्रवस्त्रिष्टुभमिषमर्चत
प्रार्चत ॥ योव्यतींरफाणयदितितृचाआनुष्टुभाउत्तमस्योत्तमांशिष्ट्वोत्तमांनिविदंदध्याल्लिंगैःपदानुपूर्वंव्याख्यास्यामो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मत्सदहिंवृत्रमपांजिन्वदुदार्यंमुद्यांदिविसमुद्रंपर्वताँऽइहोद्यद्ब्रध्नस्यविष्टपमितिपरिधानीयैवाह्येवैवाहींद्रं ॥ एवाहिश
क्रोवशीहिशक्रइतिजपित्वापाःपूर्वेषांहरिवःसुतानामितियजति ॥२॥ विहृतस्येंद्रजुषस्वप्रवहायाहिशूरहरीइह ॥ पिबा
सुतस्यमतिर्नमध्वश्चकानश्चारुर्मदाय ॥ इंद्रजठरंनव्यंनपृणस्वमधोर्दिवोन ॥ अस्यसुतस्यस्वर्णोपत्वामदाःसुवाचोअ
स्थुः ॥ इंद्रस्तुराषाण्मित्रोनजघानवृत्रंयतिर्न ॥ बिभेदवलंभृगुर्नससाहेशत्रून्मदेसोमस्य ॥ श्रुधीहवंनइंद्रोनगिरोजुष
स्वत्रीन ॥ इंद्रसयुग्भिर्दिद्युंनमत्स्वामदायमहेरणाय ॥ आत्वाविशंतुकविर्नसुतासइंद्रत्वष्टान ॥ पृणस्वकुक्षीसोमो
नाविड्ढीशूरधियाहियानः ॥ साधुर्नगृध्नुर्ऋभुर्नास्तेवशूरश्चमसोन ॥ यातेवभीमोविष्णुर्नत्वेषःसमत्सुक्रतुर्नेतिस्तोत्रिया
नुरूपाऊर्ध्वस्तोत्रियानुरूपाभ्यांतदेवशस्यंविहरैत्पादान्व्यवधायार्धर्चशःशंसैत्पूर्वासांपूर्वाणिपदानिगायत्र्यःपंक्तिभिः
पंक्तीनांतुद्वेद्वेपदेशिष्येतेताभ्यांप्रणयादुष्णिहोबृहतीभिरुष्णिहांतूत्तमान्पादान्द्वौकुर्याच्चतुरक्षरमाद्यंद्विपदाश्चतुर्धाकृ
त्वाप्रथमात्रिष्टुभोत्तराजगतीभिरुत्तमायाश्चतुर्थमक्षरमंत्यंपूर्वस्याद्यमुत्तरस्यानुष्टुभमतिछंदःस्ववदध्याद्वितीयतृतीययो
स्तृतीययोःपादयोरवसानतउपदध्यात्प्रचेतनेतिपूर्वस्याःप्रचेतयेत्युत्तरस्यामुत्तरास्वितरान्पादान्षष्ठान्कृत्वानुष्टुप्कारंशं
सेदूर्ध्वस्तोत्रियानुरूपाभ्यामातोविहृतस्तत्रप्रतिगरंओथामोदैवंमदेमदामोदेवोमथेतियाज्यांजपेनोपसृजेदेवाह्येवापाःपू
र्वेषांहरिवःसुतानामेवाहीद्रं ॥ अथैइदंसर्वंनकेवलंते ॥ एवाहिशक्रोममद्धिसोमंमधुमंतमिंद्रवशीहिशक्रःसत्रावृषंजठ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रआवृष्स्वेतिसमानमन्यत्स्तोत्रियायनिविदेपरिधानीयायाइत्याहावआहृतंषोळशिपात्रैसमुपहावंभक्षयंतिघर्मेचभक्षि
णोमैत्रावरुणस्त्रयश्छंदोगाइंद्रषोळशिन्नोजस्विस्त्वंदेवेष्वस्योजस्वंतंमामायुष्मंतंवर्चस्वंतंमनुष्येषुकुरु ॥ तस्यतइंद्रपीत
स्यानुष्टुप्छंदसउपहूतस्योपहूतोभक्षयामीतिभक्षजपः ॥ ३ ॥ अतिरात्रेपर्यायाणामुक्तःशस्योपायोहोतुरपियथाहोत्रका
णांप्रथमेपर्यायेहोतुराद्यांवर्जयित्वाप्रत्यृचंस्तोत्रियानुरूपेषुप्रथमानिपदानिद्विरुक्त्वावस्यंतिशिष्टेसमसित्वाप्रणुवंतिस
र्वेसर्वासामध्यमेमध्यमानिप्रत्यादायर्क्षगंतैःप्रणुवंत्युत्तमान्युत्तमेचतुरक्षराणित्वच्छावाकश्चतुःशस्त्राःपर्यायाहोतुराद्यं
याज्याभ्यःपूर्वेपर्यासाःपांतमावोअंधसोपादुशिप्रंधसस्त्यमुवःसत्रासाहमितिसूक्तशेषोभित्यंमेषमध्वर्यवोभरतेंद्राय
सोममितियाज्याप्रवइंद्रायमादनंप्रकृतान्यृजीषिणंःप्रतिश्रुतायवोधृषदितिपंचदशदिवश्चिदस्येतिपर्यासःसनोनव्येभि
रितिचास्यमदेपुरुवर्पांसिविद्वानितियाज्यावयमुत्वातदिदर्थावयमिंद्रत्वायवोभिर्वार्त्रहत्यायेत्युत्तमामुद्धरेदिंद्रोअंगम
हृदयमभिन्यूषुवाचमप्सुधूतस्यहरिवःपिबेहेतियाज्यैंद्रायमद्वनेसुतमिंद्रमिद्गाथिनोबृहदैंद्रसानसिमेतोन्विंद्रंस्तवामे
शानमानोअस्मिन्मघवन्निंद्रपिबतुभ्यंसुतोमदायेतियाज्यायंतइंद्रसोमोयंतेमानुषेजनउद्धेदभीत्युत्तमामुद्धरेदहंभुवम
पाय्यस्यांधसोमदायेतियाज्यातूनइंद्रक्षुमंतमाप्रद्रवपरावतोनह्यन्यंबळाकरमित्यष्टावींखयंतीरहंदांपातासुतमिंद्रोअ
स्तुसोमैहंतावृत्रमितियाज्याभित्वावृषभासुतैभिप्रगोपतिंगिरातूनइंद्रमद्यगितिसूक्तैअश्वावतिप्रोग्रांप्रीतिंवृष्णइयमिंस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यामितियाज्यैदंवसोसुतमंधइंद्रेहिमत्स्यंधसःप्रसम्राजमुपक्रमस्वाभरघृषतातदस्मैनव्यमस्यपिबयस्यजज्ञानइंद्रेतिया
ज्यैदंह्यन्वोजसामहांइंद्रोयओजसासमस्यमन्यवेविशइतिद्विचत्वारिंशद्विश्वजितेतिष्ठाहरीरथआयुज्यमानेतियाज्या
त्वेतानिषीदतात्वशत्रवागाहैनकिरिंद्रत्वदुत्तरइत्युत्तमामुद्धरैच्छ्रत्तेदधामीदंत्यत्पात्रमिंद्रपानमितियाज्यायोगेयोगेतव
स्तरंयुंजंतिब्रध्नमरुषंयदिंद्राहंप्रतेमहऊतीश्चचीवस्तववीर्येणेतियाज्यैंद्रःसुतेषुसोमेषुंयइंद्रसोमपातमंआघायेअग्निमिंधत
इतिसप्तदशंयइंद्रचमसेष्वासोमंःप्रवःसतांप्रोद्रोणेहरयःकर्माग्मन्नितियाज्यैतिपर्यायाःपर्यासवर्जंगायत्राः ॥ ४ ॥ संस्थि
तेष्वाश्विनायस्तुवतेशंसिष्यन्विसंस्थितसंचरेणनिष्क्रम्याग्नीध्रीयेजान्वाच्याहुतीर्जुहुयादग्निरज्वीगायत्रेणच्छंदसांतम
श्यांतमन्वारभैतस्मैमामवतुतस्मैस्वाहा ॥ ऊषाअज्विनीत्रैष्टुभेनच्छंदसांतामश्यांतामन्वारभैतस्यैमामवतुतस्यैस्वाहा ॥
अश्विनावज्विनौजागतेनच्छंदसांतावश्यांतावन्वारभैताभ्यांमामवतुताभ्यांस्वाहा ॥ बण्महाँऽअसिसूर्यैतिद्वाभ्यांमिं
द्रंवोविश्वतस्परीतिचप्राश्याज्यशेषमपउपस्पृशेन्नाचामैद्विज्ञायतेदेवरथोवाएषयद्धोतानाक्षमद्भिःकरवाणीतिप्राश्य
प्रतिप्रसृप्यपश्चात्स्वस्यधिष्ण्यस्योपविशैत्समस्तजंघोरुररत्निभ्यांजानुभ्यांचोपस्थंकृत्वायथाशकुनिरुत्पतिष्यन्नुपस्थकृत
स्त्वेवाश्विनंशंसेदग्निर्होतागृहपतिःसराजेतिप्रतिपदेकपातिनीपच्छंएतयाग्नेयंगायत्रमुपसंतनुयात्प्रातरनुवाकन्यायेन
तस्यैवसमाम्नायस्यसहस्रावममोदेतोःशंसेद्वार्हतास्त्रयस्तृचाःस्तोत्रियाःप्रगाथावातान्पुरस्तादनुदैवतंस्वस्यच्छंदसोय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थास्तुतंशंसैद्येषुवान्येषुपच्छोद्विपदाउपसंतनुयादेकपदास्ताभ्यश्चौत्तराविच्छंदसउद्धरैदपिवातन्यायेनशंसनैनतुपच्छो न्यास्त्रिष्टुब्जगतीभ्यःपांक्तेनोदितेसौर्याणिप्रतिपद्यतैसूर्योनोदिवउदुत्यंजातवेदसमितिनवंचित्रंदेवानांनमोमित्रस्यैद्र क्तुंनआभरांभित्वाशूरनोनुमौंबहवःसूरचक्षसइतिप्रगाथांमहीद्यौःपृथिवीचनस्तेहिद्यावापृथिवीविश्वशंभुवांविश्वस्य देवीमृचयस्यजन्मनोंनयारोषातिनग्रभदितिद्विपदांबृहस्पतेअतियदर्योअर्हादितिपरिधानीयांप्रतिपदेपरिधानीयायाइ त्याहावोबृहत्सामचैत्तस्ययोनिंप्रगाथेषुद्वितीयांतृतीयांवांनवाश्विनेनग्रहेणंसपुरोळाशेनचरंतीमेसोमासस्तिरोअन्ह्यास स्तीत्रास्तिष्ठंतिपीतयेयुवभ्यां ॥ हविष्मतानासत्यारथेनायातमुपभूषतंपिबध्याइत्यनुवाक्याहोतायक्षदश्विनासोमानां तिरोअन्ह्यानामितिप्रैषःप्रवामंधांसिमद्यान्यस्थुरुभापिबतमश्विनेतियाज्यैअध्यर्धामनवानंयद्येतस्यपुरोळाशस्यस्विष्ट कृदाचरेयुःपुरोळाअग्नेपचतौग्नेवृधानआहुतिमितिसंयाज्यै ॥ ५ ॥ यदिपर्यायानभिव्युच्छैत्सर्वेभ्यएकंसंभरेयुःप्रथमा द्धोताद्वितीयान्मैत्रावरुणोंब्राह्मणाच्छंसींचोत्तमादच्छावाकोंद्वौचेद्वौप्रथमाद्धाउत्तमादपिवासर्वेस्युःस्तोमनिर्ह्रस्ताऊर्ध्व स्तोत्रियानुरूपेभ्यःप्रथमोत्तमांस्तृचांछंसेयुर्निर्ह्रासएवैकस्मिन्होतृवर्जमित्येकंआश्विनायैकस्तोत्रियोंग्नेविवस्वदुषसइतिं तंपुरस्तादनुदैवतैंस्वस्यच्छंदसोयथास्तुतंशंसैत्रीणिषष्टिशतान्याश्विनैंविमतानांप्रसवसंनिपातैंसंसवोनंतर्हितेषुनद्यावा पर्वतेनवाप्येकैंतर्हितेष्वपितथासतिसंत्वरादेवतावाहनात्कयाशुभेतिचमरुत्वतीयेपुरस्तात्सूक्तस्यशंसैद्योजातएवेतिनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्केवल्यैममाग्नेवर्चइतिवैश्वदेवसूक्तस्यापिवैतेष्वेवनिविदोदध्यादुद्धरेदितराणिस्थानंचैन्निविदोतिहरैन्माप्रगामेतिपुर
स्तात्सूक्तंशस्त्वान्यस्मिंस्तद्दैवतेदध्यात् ॥ ६ ॥ सोमातिरेकेस्तुतशस्त्रोपजनःप्रातःसवनेस्तिसोमोअयंसुतोगौर्धयतिम
रुतामितिस्तोत्रियानुरूपौमहाँऽइंद्रोयओजसातोदेवाअवंतुनइत्यैंद्रीभिर्वैष्णवीभिश्चस्तोममतिशस्यैंद्र्यायजेद्वैष्णव्यावैं
द्रावैष्णव्येतिगाणगारैंदैवतप्रधानत्वात्संवांकर्मणासमिषाहिनोमीतिमाध्यंदिनेबण्महाँऽअसिसूर्योदुत्यदृश्रंतवपुरिति
प्रगाथौस्तोत्रियानुरूपौमहाँइंद्रोनृवद्विष्णोर्नुकंयाविश्वासांजनितारामतीनामितियाज्यातृतीयसवनउत्तरोत्तरांसंस्था
मुपेयुरातिरात्रादतिरात्राच्चैत्प्रतत्तेअद्यशिपिविष्टनामंप्रतद्विष्णुस्तवतेवीर्येणेतिस्तोत्रियानुरूपौमाध्यंदिनेनशेषस्त्वेष
मित्थासमरणंशिमीवतोरितिवायाज्या ॥ ७ ॥ क्रीतेराजनिनष्टेदग्धेवापिदग्धानिंसदोहविर्धानान्यनावृताक्रियैरन्ना
वृतावान्यंराजानमभिषुणुयुरनधिगमेपूतीकान्फाल्गुनान्यन्यावाओषधयःपूतीकैःसहप्रायश्चित्तंवाहुत्वोत्तरमालभेत
सुत्यांसूक्तमेवमन्येतप्रतिधुक्प्रातःसवनेशृतंमाध्यंदिनेदधितृतीयसवनेश्रायंतीयंब्रह्मसामयदिफाल्गुनानिवारवंतीयैं
यज्ञायज्ञीयस्यस्थानेश्रायंतीयमेकंएकदक्षिणंयज्ञंसंस्थाप्योदवसायपुनर्यजेततस्मिन्पूर्वस्यदक्षिणांदद्यात्सोमाधिगमेप्र
कृत्या ॥ ८ ॥ दीक्षितानामुपतापेपरिहितेप्रातरनुवाकेनुपाकृतेवापुष्टिपतेपुष्टिश्चक्षुषेचक्षुःप्राणायप्राणंत्मनेत्मानंवाचे
वाचमस्मैपुनर्धेहिस्वाहेतिब्रह्माहुतिंहुत्वाशीतोष्णाअपःसमानीयैकविंशतिमासुयवान्कुशपिंजूलांश्चावधायंता भिरद्भि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रबर्थंकुर्वीतंताभिरेनमाप्लावयैज्जीवानामस्थता३॥ इममुंजीवयतजीविकानामस्थता ३॥ इममुंजीवयतसंजीवानाम
स्थता३॥इममुंसंजीवयतसंजीविकानामस्थता३॥इममुंसंजीवयतैत्यौषधिसूक्तेनचाप्लाव्यानुमृजेंदुपांश्वंतर्यामौतेप्रा
णापानौपातांमसाउपांशुसवनंस्तेव्यानंपात्वसावैंद्रवायवंस्तेवाचंपात्वसौमैत्रावरुणंस्तेचक्षुषीपात्वसावाश्विनंस्तेश्रोत्रं
पात्वसावाग्रयणंस्तेदक्षक्रतूपात्वसाउक्थ्यंस्तेंगानिपात्वसौध्रुवंस्तआयुःपात्वसावितियथासनमनुपरिक्रमणैंत्रातारमिंद्र
मवितारमिंद्रमितिताक्ष्यार्दिर्यद्यप्यन्यदैकाहिकाद्वैश्वदेवैंस्वस्त्यात्रेयेनिविदंदध्यात्प्रकृत्यानिगदे ॥९॥ संस्थितेतीर्थेन
निर्हृत्यावभृथेप्रेतालंकारान्कुर्वंतिकेशश्मश्रुलोमनखानिवापयंतिनलदेनानुलिंपंतिनलदमालांप्रतिमुंचंतिनिष्पुरीषमेके
कृत्वापृषदाज्यंपूरयंत्यहतस्यवाससंःपाशतःपादमात्रमवच्छिद्यप्रोर्णुवंतिप्रत्यग्दशेनाविःपादमवच्छेदमस्यपुत्राअमाकु
वीरन्नग्नीनस्यसमारोप्यदक्षिणतोबहिर्वेदिदहेयुराहार्येणानाहिताग्निंपत्नींचप्रत्येत्याहःसमापयेयुःप्रातरनभ्यासमनभि
हिंकृतानिशस्त्रानुवचनाभिष्टवनसंस्तवनानिपुराग्रहग्रहणात्तीर्थेननिष्क्रम्यत्रिःप्रसव्यमायतनंपरीत्यपर्युपविशंतिपश्चा
द्धोतोत्तरोध्वर्युस्तस्यपश्चाच्छंदोगाआयंगौःपृश्निरक्रमीदित्युपांशुस्तुवतेस्तुतैहोताप्रसव्यमायतनंपरिव्रजन्स्तोत्रियमनु
व्रजेदप्रणुवन्यामीश्वप्रेहिप्रेहिपथिभिःपूर्व्येभिरितिपंचानांतृतीयमुद्धरेन्मैनमग्नेविदहोमाभिशोचइतिषट्पूषात्वेतश्चया
वयतुप्रविद्वानितिचतस्रउपसर्पमातरंभूमिमेतामितिचतस्रःसोमएकेभ्यउरूणसावसुतृपाउदुंबलाविंतिचसमाप्यसंचि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यतीर्थेनप्रपाद्यंयथासनमासादयेयुर्भक्षेषुप्राणभक्षान्भक्षयित्वादक्षिणेमार्जालीयेनिनयेयुर्दक्षिणस्यावावेदिश्रोण्यांसप्त
दशमहर्भवतिंत्रिवृतःपवमानारथंतरपृष्टोग्निष्टोमःसंस्थितेऽवभृथमेकेगमयैंत्येतस्यैतदहरभिशब्दयंतोनिर्मथ्येनवाद
ग्ध्वानिखार्यसंवत्सरादेनमग्निष्टोमेनयाजयेयुर्नैदिष्ठिनंवादीक्षयेयुरपिवोत्थानंगृहपताउक्तःस्तुतशस्त्रविकारएकाहेषुय
यजमानासनेशयीतसंस्थितेपायतीष्ववभृथंगमयेयुरित्यालेखनःपूर्वेणसदोदहेयुरित्याश्मरथ्यएषएवावभृथः ॥ १० ॥
अग्निष्टोमोत्यग्निष्टोमउक्थ्यःषोळशीवाजपेयोतिरात्रोप्तोर्यामइतिसंस्थास्तासांयामुपयंतितस्याअंतेयज्ञपुच्छंमनुयाजाद्यु
क्तैंपशुनाशंयुवाकादुत्तमस्त्विहसूक्तवाकप्रैषौवीवृधतेतिपुरोळाशदेवतौपशुदेवतामेकैयदिसवनीयस्यपशोःपशुपुरोळा
शंकुर्युरवीवृधेतांपुरोळाशैरित्येवब्रूयात्सवनीयैरेवेंद्रोवर्धतैपशुपुरोळाशेनपशुदेवतोर्ध्वैशंयुवाकाद्धारियोजनौपाःसोमम
स्तमिंद्रप्रयाहिंधानासोमानामिंद्राद्धिचपिबचयुनज्मितेब्रह्मणाकेशिनाहरीइतीज्यानुवाक्येअंत्येष्वहस्सुतिष्ठासुकंमघ
वन्मापरागाअयंयज्ञोदेवयाअयंमियेधइतीतरेषुपरायाहिमघवन्नाचयाहीतिवानुवाक्यौत्तरवत्स्वहःस्वननुवषट्कृतेतिं
प्रैषंमैत्रावरुणआहेहमदएवंमघवन्निंद्रतेश्वइत्यद्येत्यतिरात्रेद्यसुत्यामितिचतस्यांतंश्रुत्वाग्नीध्रःश्वःसुत्यांप्राहश्वःसुत्यांवा
एषांब्राह्मणानौतामिंद्रायेंद्राग्निभ्यांप्रब्रवीमिंमित्रावरुणाभ्यांवसुभ्योरुद्रेभ्यआदित्येभ्योविश्वेभ्योदेवेभ्यौब्राह्मणेभ्यः
सौम्येभ्यःसोमपेभ्योब्रह्मन्वाचंयच्छेति ॥ ११ ॥ आहृतमुन्नेत्राद्रोणकलशंमिळामिवप्रतिगृह्यौपहवमिष्ट्वावेक्षेतहंरिव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्तेहारियोजनस्यस्तुतस्तोमस्यशस्त्वोक्थस्यैष्टयजुषोयोभक्षौगोसनिरश्वसनिस्तस्यतउपहूतस्योपहूतोभक्षयामीतिप्राण
भक्षंभक्षयित्वाप्रतिप्रदायद्रोणकलशमात्मानमाप्याय्ययथाप्रसृतंविनिःसृप्याग्नीध्रीयेविनिःसृताहुतीजुह्वत्ययंपीतइंदु
रिंद्रंमदेधादयंविप्रोवाचमर्चन्नियच्छन् ॥ अयंकस्यचिद्रुहतादभीकेसोमोराजानसखायंरिषेधात्स्वाहा ॥ इदंराधो
अग्निनादत्तमागाद्यशोभर्गःसहओजोबलंच ॥ दीर्घायुत्वायशतशारदायप्रतिगृभ्णामिमहतेवीर्यायस्वाहेत्याहवनीये
षट्षट्शकलान्यभ्यादधातिदेवकृतस्यैनसोवयजनमसिस्वाहा ॥ पितृकृतस्यैनसोवयजनमसिस्वाहा ॥ मनुष्यकृतस्यै
नसोवयजनमसिस्वाहा ॥ आत्मकृतस्यैनसोवयजनमसिस्वाहा ॥ एनसएनसोवयजनमसिस्वाहा ॥ यद्वोदेवाश्चकृ
मजिह्वयागुर्वितिचद्रोणकलशाद्धानागृहीत्वावेक्षेरन्नापूर्यास्थामापूरयतप्रजयाचधनेनचेंद्रस्यकामदुघास्थकामान्मेधु
ङ्गध्वैंप्रजांचपशूंश्चेत्यवघ्रायाँतःपरिधिदेशेनिवपेयुःप्रत्येत्यतीर्थदेशेपांपूर्णाश्चमसांस्तान्त्सव्यावृतोव्रजंतिहरिततृणानि
विमृज्यप्रतिस्वंचमसेभ्यस्त्रिःप्रसव्यमुदकैरात्मनःपर्युक्षंतेदक्षिणैःपाणिभिरितरैर्वाप्रदक्षिणंस्वधापित्रेस्वधापितामहाय
स्वधाप्रपितामहायेत्युक्त्वैजीवमृतेभ्यःपाणींश्चमसेष्ववधायाप्सुधूतस्यदेवसोमतेमतिविदोनृभिःसुतस्यस्तुतस्तोमस्यश
स्त्वोक्थस्यैष्टयजुषोयोभक्षौगोसनिरश्वसनिस्तस्यतउपहूतस्योपहूतोभक्षयामीतिप्राणभक्षान्भक्षयित्वामाहंप्रजांपरासि
चमित्येतेनाभ्यात्मंनिनीयाच्छायंयोमरुतःश्लोकएत्वित्येतयाभिमृशंतिदधिक्राव्णोअकारिषमित्याग्नीध्रीयेदधिद्रप्सा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्प्राश्यसख्यानिविसृजंतउभाकवीयुवानासत्यादाधर्मणस्पती ॥ परिसत्यस्यधर्मणाविसख्यानिसृजामहइति ॥ १२ ॥
पत्नीसंयाजैश्चरित्वावभृथंव्रजंतिव्रजंतःसान्नोनिधनमुभयैत्यवभृथेष्ट्वातिष्ठंतश्चरंतिप्रयाजाद्यनुयाजांतानास्यामिळा
नबर्हिष्मंतौप्रयाजानुयाजावप्सुमंतौगायत्रौवारुणंहविरवतेहेळोवरुणनमोभिरितिद्वेअग्नीवरुणौस्विष्टकृदर्थैत्वंनो
अग्नेवरुणस्यविद्वानितिद्वेसंस्थितायांपादानुदकांतेवदध्युर्नमोवरुणायाभिष्ठितौवरुणस्यपाशइतिततआचामंतिभक्ष
स्यावभृथोसिभक्षितस्यावभृथोसिभक्षंकृतस्यावभृथोसीतिप्रोथ्यप्रथमेनप्रष्ठीवंतिप्रगिरंत्युत्तराभ्यांततआचम्याप्लवंत
आपोअस्मान्मातरःशुंधयंत्विदमापःप्रवहतसुमित्र्यानआपओषधयःसंत्वित्येतयावृताभ्युक्षेरन्नेवाप्यदीक्षितांउन्नेनैना
नुन्नयत्युन्नेतरुन्नोन्नयौन्नेतर्वस्वोअभ्युन्नयानइत्युन्नीयमानाजपंत्युद्वयंतमसस्परीत्युदेत्यसमानमतऊर्ध्वंहृदयशूलेनासं
स्थाजपांत्संस्थाजपेनोपतिष्ठंतेयेयेपवृत्तकर्माणः ॥ १३ ॥ गार्हपत्यउदयनीययाचरंतिसाप्रायणीययोक्तापथ्यास्वस्ति
रिहोत्तमाज्यहविषांविपरीताश्चयाज्यानुवाक्यास्तेचैवकुर्युर्येप्रायणीयांप्रकृत्यासंयाज्यैसंस्थितायांमैत्रावरुण्यनूबंध्यास
दस्येकउत्तरवेद्यामेकैहुतायांवपायांयद्येकादशिन्यग्रतःकृतांग्नीषोमीयेणसंचरेणव्रजित्वागार्हपत्येत्वाष्ट्रेणपशुनाचरंत्यै
जनादिपर्यग्निकृत्वौत्सृजंत्यपुनरायनायदित्वध्वर्यवआज्येनसमाप्नुयुस्तथैवहोताकुर्यात्संप्रैषवदादेशान्पशुवन्निपाता
न्यद्यनूबंध्यैपशुपुरोळाशमनुदेविकाहवींषिनिर्वपेयुर्धातानुमतीराकासिनीवालीकुहूः ॥ धातादददातुदाशुषेप्राचींजीवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुमक्षितां ॥ वयंदेवस्यधीमहिंसुमतिंवाजिनीवतः ॥ धाताप्रजानामुतरायईशेधातेदंविश्वंभुवनंजजान ॥ धाताकृ
ष्टीरनिमिषाभिचष्टेधात्रइद्धव्यंघृतवज्जुहोतेतिंदेवीनांचेत्सूर्योद्यौरुषागौःपृथिवीस्मत्पुरंधिर्नआगहीतिद्वेआद्यांतनोषि
रश्मिभिरावहंतीपोष्यावार्याणिंनताअर्वारेणुकाटोअश्नुतेनतानशंतिनदभातितस्करोबळित्थापर्वतानौद्दृढाचिद्याव
नस्पतींन्पश्वलाभेपयस्यांमैत्रावरुण्यनूबंध्यास्थानंआज्यभागप्रभृतिवाजिनांतांकर्मिणोवाजिनंभक्षयेयुःसर्वेतुदीक्षिताः
सर्वेतुदीक्षितोत्थिताःपृथगग्नीन्त्समारोप्योदग्देवयजनान्मथित्वोदवसानीययायजंतेपौनराधेयिक्यविकृताविकृता ॥
॥ १४ ॥ ॥ इत्याश्वलायनश्रौतसूत्रेपूर्वषट्केषष्ठोऽध्यायः ॥ ६ ॥ ॥ ॥ ॥

॥ इत्याश्वलायनश्रौतसूत्रेपूर्वषट्कःसंपूर्णः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इत्याश्वलायनश्रौतसूत्रेपूर्वषट्कः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=18.08.20 11:06
,TRANSFERRED=2020/08/18 at 11:17:16
,PAGES=85
,TYPE=STD
,NAME=S0003511
,Book Name=M-3073-AASHAVALAYAN SHOUTSUTRA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection